নন্বেবম্ভূতং পরমেশ্বরং ত্বাং কিমিতি কেচিন্নাদ্রিয়ন্তে তত্রাহ : অবজানন্তীতি দ্বাভ্যাং মামিতি সর্ব্বভূতমহেশ্বরং স্বরূপং মদীয়ং পরং তত্ত্বমজানন্তো মূঢা মামবমন্যন্তে : অজ্ঞানে হেতুঃ : শুদ্ধসত্ত্বময়ীমপি তনুং ভক্তেচ্ছাবশান্মনুষ্যাকার
মাশ্রিতবন্তং ॥ ১১ ॥ কিঞ্চ মোঘাশা ইতি : মত্তোন্যদ্দেবতান্তরং ক্ষিপ্রং ফলং দাস্যতীতি এবম্ভূতা মোঘা নিষ্ফলা আশা যেষাং তে : অতএব মদ্বিমুখত্বাৎ মোঘানি নিষ্ফলানি কর্ম্মাণি যেষাং তে : মোঘমেব না
নাকুতর্কাশ্রিতং শাস্ত্রজ্ঞানং যেষাং অতএব বিচেতসো বিক্ষিপ্তচিত্তাঃ : বিগতং চেতো যেষাং ৷ সর্ব্বত্র হেতুঃ : রাক্ষসীং তামসীং হিংসাদিপ্রচুরাং আসুরীঞ্চ রাজসীঞ্চ কামদর্পাদিবহুলাং মোহিনীং ইন্দ্রিয়ভ্রংশ
করীং প্রকৃতিং স্বভাবং আশ্রিতাঃ সন্তঃ মাং অবজানন্তীতি পূর্ব্বেণান্বয়ঃ ॥ ১২ ॥ কে তর্হি ত্বামারাধয়ন্তীত্যত আহ : মহাত্মান ইতি : মহাত্মানস্তু কামাদ্যনভিভূতচিত্তাঃ অতএব সত্ত্বসংশুদ্ধি
রিত্যাদিবক্ষ্যমাণাং দৈবীং প্রকৃতিমাশ্রিতাঃ ৲ অতএব ন বিদ্যতে অন্যস্মিন্মনো যেষাং : তে ভূতাদিং জগৎকারণমব্যয়ং নিত্যঞ্চ মাং জ্ঞাত্বা ভজন্তি ॥ ১৩ ॥ তেষাং ভজনপ্রকারমাহ ৲

শ্রী৪॰ অবজানন্তি মাং মূঢা মানুষীং তনুমাশ্রিতং ৲ পরং ভাবমজানন্তো মম ভূতমহে
শ্বরং ॥ ১১ ॥ মোঘাশা মোঘকর্ম্মাণো মোঘজ্ঞানা বিচেতসঃ ৲
রাক্ষসীমাসুরীঞ্চৈব প্রকৃতিং মোহিনীং শ্রিতাঃ ॥ ১২ ॥ মহাত্মানস্তু
মাং পার্থ দৈবীং প্রকৃতিমাশ্রিতাঃ ৲ ভজন্ত্যনন্যমনসো জ্ঞাত্বা ভূতাদি
মব্যয়ং ॥ ১৩ ॥ সততং কীর্ত্তয়ন্তো মাং যতন্তশ্চ দৃঢব্রতাঃ ৲
নমস্যন্তশ্চ মাং ভক্ত্যা নিত্যযুক্তা উপাসতে ॥ ১৪ ॥ জ্ঞানযজ্ঞেন চাপ্যন্যে যজ
ন্তো মামুপাসতে । একত্বেন পৃথক্ত্বেন বহুধা বিশ্বতোমুখং ॥ ১৫ ॥ অহং ক্রতুরহং যজ্ঞঃ স্বধাহমহমৌষধং । মন্ত্রোহমহমেবাজ্যমহমগ্নিরহং হুতং ॥ ১৬ ॥

সততমিতি দ্বাভ্যাং : সর্ব্বদা স্তোত্রমন্ত্রাদিভিঃ কীর্ত্তয়ন্তঃ : কেচিন্মামুপাসতে সেবন্তে : দৃঢানি ব্রতানি নিয়মা যেষাং তাদৃশাঃ সন্তঃ যতন্তশ্চ ঈশ্বরজ্ঞানাদিষু যত্নং কুর্ব্বন্তঃ কেচিদ্ভক্ত্যা নমস্যন্তঃ প্রণমন্তশ্চ
অন্যে নিত্যমভিযুক্তা অবহিতচিত্তাঃ সেবন্তে : ভক্ত্যেতি নিত্যযুক্তা ইতি কীর্ত্তনাদিষ্বপি দ্রষ্টব্যং ॥ ১৪ ॥ কিঞ্চ জ্ঞানেতি : বাসুদেবঃ সর্ব্বমিতি : সর্ব্বাত্মত্বদর্শনং জ্ঞানং তদেব যজ্ঞস্তেন জ্ঞানযজ্ঞেন মাং যজন্তঃ
অন্যে মামুপাসতে : তত্রাপি কেচিদেকত্বেন : অভেদভাবনয়া কেচিৎ পৃথক্ত্বেন ভাবনয়া দাসোহমিতি ভাবেন : কেচিত্তু বিশ্বতোমুখং সর্ব্বাত্মকং মাং বহুধা ব্রহ্মরুদ্রাদিরূপেণ উপাসতে ॥ ১৫ ॥ সর্ব্বাত্মক
ত্বং প্রপঞ্চয়তি চতুর্ভিঃ : ক্রতুঃ শ্রৌতাগ্নিষ্টোমাদিযজ্ঞঃ : স্মার্ত্তঃ পঞ্চযজ্ঞাদি : স্বধা পিতৃভ্যো দীয়মানমন্নং শ্রাদ্ধাদি : ঔষধং ঔষধিপ্রভবমন্নং ভেষজং বা : মন্ত্রো যাজ্যাপুরোনুবাক্যাদিঃ : আজ্যং হোমাদিসাধনং অগ্নিরাহ

পিতাহমিতি : ধাতা কর্ম্মফলবিধাতা : বেদ্যং জ্ঞেয়ং বস্তু : পবিত্রং শোধকং প্রায়শ্চিত্তাত্মকং : ওঁকারঃ প্রণবঃ : ঋগাদয়ো বেদাশ্চাহমেব স্পষ্টমন্যৎ ॥ ১৭ ॥ কিঞ্চ গতিরিতি ভর্ত্তা প্রভুঃ সাক্ষীতি
গম্যত ইতি গতিঃ ফলং ভর্ত্তা পোষয়িতা : প্রভুর্নিয়ন্তা সাক্ষী শুভাশুভদ্রষ্টা নিবাসো ভোগস্থানং : শরণং রক্ষকঃ সুহৃৎ হিতকর্ত্তা প্রকর্ষেণ ভবত্যনেনেতি প্রভবঃ স্রষ্টা প্রলীয়তে হনেনেতি প্রলয়ঃ
সংহর্ত্তা : তিষ্ঠত্যস্মিন্নিতি স্থানং আধারঃ : নিধীয়তে ঽস্মিন্নিতি নিধানং লয়স্থানং বীজং কারণং অব্যয়মবিনাশি : ন তু ব্রীহ্যাদিবীজবদ্বিনশ্বরমিত্যর্থঃ ॥ ১৮ ॥ কিঞ্চ তপাম্যহমিতি : আদিত্যো
ভূত্বা রশ্মিভিঃ নিদাঘকালে তপামি জগত্তাপং করোমি : বর্ষাসময়ে বৃষ্টিং উৎসৃজামি বিসৃজামি : কদাচিৎ বর্ষং নিগৃহ্ণামি আকর্ষামি : অমৃতং জীবনং মৃত্যুশ্চ নাশঃ সৎ স্থূলং দৃশ্যং অসৎ সূক্ষ্মং
অদৃশ্যং এতৎসর্ব্বমহমেবেতি মত্বা মামেব বহুধা উপাসতে ইতি পূর্ব্বেণান্বয়ঃ ॥ ১৯ ॥ তদেবমজানন্তি মাং মূঢ়া ইতি শ্লোকদ্বয়েন ক্ষিপ্রফলাশয়া : দেবতান্তরং যজন্তো মাং নাদ্রিয়ন্তে ইত্যুক্তং

পিতাহমস্য জগতো মাতা ধাতা পিতামহঃ । বেদ্যং পবিত্রমোঙ্কার ঋক্ সাম যজুরেব চ ॥ ১৭ ॥ গতির্ভর্ত্তা প্রভুঃ সাক্ষী নিবাসঃ শরণং সুহৃৎ । প্রভব
ঃ প্রলয়ঃ স্থানং নিধানং বীজমব্যয়ং ॥ ১৮ ॥ তপাম্যহমহং বর্ষং নিগৃহ্ণাম্যু ৎসৃজামি চ । অমৃতঞ্চৈব মৃত্যুশ্চ সদসচ্চাহমর্জ্জুন ॥ ১৯ ॥ ত্রৈবিদ্য
া মাং সোমপাঃ পূতপাপা যজ্ঞৈরিষ্ট্বা স্বর্গতিং প্রার্থয়ন্তে । তে পুণ্যমাসা দ্য সুরেন্দ্রলোকমশ্নন্তি দিব্যান্দিবি দেবভোগান্ ॥ ২০ ॥ তে তং ভুক্ত্বা স্বর্গ
লোকং বিশালং ক্ষীণে পুণ্যে মর্ত্ত্যলোকং বিশন্তি । এবং ত্র য়ীধর্ম্মমনুপ্রপন্না গতাগতং কামকামা লভন্তে ॥ ২১ ॥ ০ ॥

দর্শিতাঃ : মহাত্মানস্ত্বিত্যাদিনা চ তত্ত্বজ্ঞাঃ অপ্রকারেণ যৎ সর্ব্বত্র নবাপেক্ষমেশ্বরং যে ভজন্তি : তেষাং জন্মমৃত্যুপ্রবাহো ন নিবর্ত্তত ইত্যাহ ত্রৈবিদ্যা ইতি দ্বাভ্যাং : ঋগ্যজুঃসামলক্ষণাস্তিস্রো বিদ্যা যেষাং
তে ত্রৈবিদ্যাঃ ত্রিবিদ্যা এব ত্রৈবিদ্যাঃ স্বার্থে ষ্ণ : তিস্রো বিদ্যা অধীয়তে জানন্তি বা ত্রৈবিদ্যাঃ ত্রয়োক্ত কর্ম্মপরা ইত্যর্থঃ । বেদত্রয়বিহিতৈর্যজ্ঞৈর্মামিষ্ট্বা মামেব রূপান্তরেষ্বিষ্ট্বা অজানন্তোঽপি
ইন্দ্রাদিরূপেণ মামেবেষ্ট্বা যজ্ঞশেষং সোমং পিবন্তীতি সোমপাঃ তেনৈব পূতপাপাঃ শোধিতকল্মষাঃ সন্তঃ স্বর্গতিং স্বর্গং প্রতি গতিং প্রার্থয়ন্তে : তে পুণ্যফলরূপং সুরেন্দ্রস্য লোকং স্বর্গমা
সাদ্য দিবি স্বর্গে দিব্যানুত্তমান্ দেবানাং ভোগানশ্নন্তি ভুঞ্জতে ॥ ২০ ॥ তে তমিতি : তে স্বর্গকামাঃ তং প্রার্থিতং বিপুলং স্বর্গলোকং ভুক্ত্বা ভোগপ্রাপকে পুণ্যে ক্ষীণে সতি মর্ত্ত্যলোকং বিশন্তি : এ
[illegible] বেদত্রয়বিহিতং ধর্ম্মমনুপ্রপন্নাঃ প্রাপ্তাঃ কামকামাঃ ভোগান্ কাময়মানাঃ গতাগতং যাতায়াতং লভন্তে ॥ ২১ ॥ শ্রীরামায় নমঃ ॥ ২১ ॥

দত্তঞ্চাস্তুসঙ্গম্যাদনন্তান্ধত্তিযুক্তিমাহ : অনন্যাঃ : নাস্তিমত্তোঽন্যৎকাম্যং যেষাং তথাভূতাযেজনামাশ্চিন্তয়ন্তঃসেবন্তে তেষাংনিত্যাভিযুক্তানাংসর্ব্বদামদেকনিষ্ঠানাংযোগংধর্ম্মাদি
লাভং ক্ষেমঞ্চতৎপালনং মোক্ষংবা : তৈরপ্রার্থিতমপিঅহমেববহামিপ্রাপয়ামি ॥ ২২ ॥ নন্বচ : ত্বত্তোঽন্যদেবতান্তরস্যাভাবাদিন্দ্রাদিসেবিনোঽপি : ত্বদ্ভক্তাএবেতি : কথন্তেগতাগতংলভেরন্
অআহ : যেঽপীতি : শ্রদ্ধয়ান্বিতাভক্তাঃসন্তোযেজনাঅন্যদেবতাইন্দ্রাদিরূপাযেযজন্তে : তেঽপিমামেবযজন্তিসত্যং : কিন্তুঅবিধিপূর্ব্বকং মোক্ষপ্রাপকংবিধিংবিনাযজন্তে : অতস্তেপুনরাবর্ত্তন্তে
॥ ২৩ ॥ এতদেববিবৃণোতি অহমিতি : সর্ব্বেষাংযজ্ঞানাংতত্তদ্দেবতারূপেণাহমেব : ভোক্তাপ্রভুশ্চস্বামীফলদাতাপ্যহমেবেত্যর্থঃ এবম্ভূতংমাংতত্ত্বেনযথাবন্নাভিজানন্তি : অতশ্চ্যবন্তি
পুনরাবর্ত্তন্তে ॥ ২৪ ॥ যেতুসর্ব্বদেবতাসু মামেবান্তর্য্যামিনংপশ্যন্তোযজন্তি : তেতুনাবর্ত্তন্তে ইত্যুপপাদয়তি যান্তীতি : দেবেষুইন্দ্রাদিষুব্রতংনিয়মোযেষাং : তেদেবান্তান্দে

অনন্যাশ্চিন্তয়ন্তোমাংযেজনাঃপর্য্যুপাসতে ২ তেষাংনিত্যাভিযুক্তানাংযোগক্ষেমংবহাম্যহং ॥ ২২ ॥ যেঽপ্যন্যদেবতাভক্তাযজন্তেশ্রদ্ধয়ান্বি
শ্রী৪১ তাঃ ২ তেঽপিমামেবকৌন্তেয়যজন্ত্যবিধিপূর্ব্বকং ॥ ২৩ ॥ অহংহিসর্ব্বযজ্ঞানাংভোক্তাচপ্রভুরেবচ । নতুমামভিজানন্তিতত্ত্বেনাতশ্চ্য
বন্তিতে ॥ ২৪ ॥ যান্তিদেবব্রতাদেবান্পিতৄন্যান্তিপিতৃব্রতাঃ ২ ভূতানিযান্তিভূতেজ্যাযান্তিমদ্যাজিনোঽপিমাং ॥ ২৫ ॥
পত্রংপুষ্পংফলংতোয়ংযোমেভক্ত্যাপ্রযচ্ছতি ২ ৩ তদহংভক্ত্যুপহৃতমশ্নামিপ্রযতাত্মনঃ ॥ ২৬ ॥

যান্তি : অতঃপুনরাবর্ত্তন্তে : পিতৃষুব্রতংযেষাংশ্রাদ্ধাদিক্রিয়াপরাণাং তেপিতৄন্যান্তি : ভূতেষুবিনায়কমাতৃগণাদিষুইজ্যাপূজাযেষাং : তেভূতেজ্যাস্তানিযান্তি : মাংযষ্টুংশীলংযেষাংমদ্যাজিনস্তে
তুমামক্ষয়পরমানন্দরূপংযান্তি ॥ ২৫ ॥ তদেবংস্বভক্তানামক্ষয়ফলমুক্তং : অনায়াসঞ্চস্বভক্তের্দর্শয়তিপত্রমিতি : পত্রপুষ্পাদিমাত্রমপিমহ্যং : ভক্ত্যাযঃপ্রযচ্ছতি : তস্যপ্রযতাত্মনঃশুদ্ধচি
ত্তস্যনিষ্কামস্য : তৎপুষ্পাদিকংভক্ত্যাতেনোপহৃতং : সমর্পিতমহমশ্নামি : প্রাপ্নোমিপ্রীত্যা গৃহ্লামি : নহিমহাবিভূতিপাতেঃপরমেশ্বরস্যক্ষুদ্রদেবতানামিববহুবিত্তসাধ্যৈর্যাগাদিভিঃ
পরিতোষঃস্যাৎ : কিন্তুভক্তিমাত্রেণ : অতোভক্তেনসমর্পিতং : যৎকিঞ্চিৎপত্রাদিমাত্রমর্পিতমপিঅশ্নামি : অতোভবাদশিতঃ ॥ ২৬ ॥

নচফলপুষ্পাদিকমপিযজ্ঞার্থপশুসোমাদিদ্রব্যবন্মদর্থমেবঽয্যমেনোপাদ্যসমর্পণীয়ং : কিন্তু হি যৎ করোষীতি : স্বভাবতো বা শাস্ত্রতো বা যৎ কিঞ্চিৎ কর্ম্ম করোষি : তথা যদশ্না
সি : যচ্চ তপস্যসি তৎসর্ব্বং : কায়োক্তিঃ সর্ব্বং মদর্পিতং যথা ভবতি তথা কুরুষ্ব ॥ ২৭ ॥ এবঞ্চ যৎ ফলং প্রাপ্স্যসি তচ্ছৃণু শুভাশুভেতি : এবং কুর্ব্বন্ কর্ম্মবন্ধনৈঃ কর্ম্মনিমিত্তৈঃ জন্মানিষ্টং
নৈর্ম্মুক্তো ভবিষ্যসি ৮ কর্ম্মণাং ময়ি সমর্পিতত্বেন তৎফলসম্বন্ধান্ন পাপত্বেঃ : তৈশ্চ মুক্তঃ সন্ন্যাসযোগযুক্তাত্মা : সন্ন্যাসঃ কর্ম্মণাং মদর্পণং : স এব যোগঃ : তেন যুক্তাত্মা

যৎ করোষি যদশ্নাসি যজ্জুহোষি দদাসি যৎ ১ যত্তপস্যসি কৌন্তেয় তৎ কুরুষ্ব মদর্পণং ॥ ২৭ ॥ শুভাশুভফলৈরেবং মোক্ষ্যসে
কর্ম্মবন্ধনৈঃ ২ সন্ন্যাসযোগযুক্তাত্মা বিমুক্তো মামুপৈষ্যসি ॥ ২৮ ॥ সমোঽহং সর্ব্বভূতেষু ন মে দ্বেষ্যোঽস্তি ন প্রিয়ঃ ৮ যে ভজন্তি তু মাং ভক্ত্যা ময়ি
তে তেষু চাপ্যহং ॥ ২৯ ॥

মাচিত্তং যস্য তথাভূতস্ত্বং মাং প্রাপ্স্যসীত্যর্থঃ ॥ ২৮ ॥ যদি ভক্তেভ্য এব মোক্ষং দদাসি নাভক্তেভ্যঃ তর্হি কিং তবাপি রাগদ্বেষাদিকৃতং বৈষম্যং নাস : অস্তি নেত্যাহ : সমোহমিতি : সর্ব্বেষু ভূতেষ্ব
হং সমঃ : দ্বেষ্যশ্চ নাস্ত্যেব : এবং সত্যপি যে মাং ভজন্তে : তে ভক্তা ময়ি বর্ত্তন্তে : অহমপি তেষু অনুগ্রাহকতয়া বর্ত্তে : অয়ং ভাবঃ : যথা স্বেষু আশ্রয়েষু কেষ্বেব তমঃ শীতাদি দুঃখমপাকুর্ব্বতোঽপি ন বৈ
ষম্যং : যথা কল্পবৃক্ষস্য : তথা ভক্তপক্ষপাতিনোঽপি মম নাস্ত্যেব বৈষম্যং ৮ কিন্তু মদ্ভজনস্যৈবায়ং মহিমেতি ॥ ২৯ ॥ রামায় নমঃ ॥

অপিচ মদ্ভক্তের্ব্বিভবমহিমাশ্চর্য্যমিত্যাহ : অপিচেদিতি : অত্যন্তং দুরাচারোপি যদি পৃথগ্ভাবেন দেবতান্তরভক্তিমকুর্ব্বন মামেব পরমেশ্বরং ভজতে : তর্হি সাধুঃ শ্রেষ্ঠ এব মন্তব্যঃ
যতোসৌ সম্যগ্ব্যবসিতঃ শোভনমধ্যবসায়ং কৃতবান ॥ ৩০ ॥ ননুকথং সদাচারহীনো ধর্ম্মসাধনমালনেন সাধুর্মন্তব্য ইত্যতআহ : ক্ষিপ্রমিতি : দুরাচারোপি মাং ভজন : ২ শী
ঘ্রং ধর্ম্মচিত্তো ভবতি : অতএব শশ্বৎ শান্তিং চিত্তোপশমরূপাং শাশ্বতীমপি শান্তিং পরমেশ্বরনিষ্ঠাং নিতরাং গচ্ছতি প্রাপ্নোতি : কুতর্ককর্কশবাদিনো নৈতন্মন্যেরন

শ্রীঃ ৪২ অপিচেৎ সুদুরাচারো ভজতে মামনন্যভাক্ ২ সাধুরেব সমন্তব্যঃ সম্যগ্ব্যবসিতোহিসঃ ॥ ৩০ ॥
ক্ষিপ্রং ভবতি ধর্ম্মাত্মা শশ্বৎ শান্তিং নিগচ্ছতি ২ কৌন্তেয় প্রতিজানীহি ন মে ভক্তঃ প্রণশ্যতি ॥ ৩১ ॥

ইতি শঙ্কাং তু নমদ্ভক্তো নশ্যতীত্যাহ : কৌন্তেয়েতি : হে কৌন্তেয় পটহকাহলাদিমহাঘোষপূর্ব্বকং বিবদমানানাং সভাং গত্বা বাহুমুৎক্ষিপ্য নিঃশঙ্কং প্রতিজানীহি প্রতিজ্ঞাং কু
রু : কথমিতি মে পরমেশ্বরস্য ভক্তো দুরাচারোপি ন প্রণশ্যতি : অপিতু কৃতার্থ এব ভবতীতি : ততশ্চ তে কুতার্কিকাঃ প্রৌঢ়িবিধ্বস্তবিপ্রতিপত্তয়ো নিশ্চিতং ত্বামেব গুরুত্বেনাশ্রয়েরন
২ ॥ ৩১ ॥

এতাশ্চৈবং মদ্ভক্তিস্তু পুনাতীতি কিম্বক্তব্যং যতো মদ্ভক্তির্দুষ্কুলানপি অনধিকারিণোঽপি সংসারান্মোচয়তীত্যাহ মাং হীতি যেঽপি পাপযোনয়ঃ স্যুঃ যেঽপি বৈশ্যাস্তথা কৃষ্যাদিনি
রতাঃ স্ত্রিয়ঃ শূদ্রাশ্চাধ্যয়নাদিরহিতাঃ তেঽপি মাং ব্যপাশ্রিত্য সংসেব্য পরাং গতিং যান্তি হি নিশ্চিতং ॥৩২॥ যদেবং সংকুলাঃ সদাচারাঃ ব্রাহ্মণাস্তু মদ্ভক্তাঃ পরাং গতিং যান্তীতি
।

মাং হি পার্থ ব্যপাশ্রিত্য যেঽপি স্যুঃ পাপযোনয়ঃ। ২ স্ত্রিয়ো বৈশ্যাস্তথা শূদ্রাস্তেঽপি যান্তি পরাং গতিং ॥৩২॥

কিং পুনর্ব্রাহ্মণাঃ পুণ্যা ভক্তা রাজর্ষয়স্তথা। ২ অনিত্যমসুখং লোকমিমং প্রাপ্য ভজস্ব মাং ॥৩৩॥

কিম্পুনর্বক্তব্যমিত্যাহ কিম্পুনরিতি পুণ্যাঃ সুকৃতিনো ব্রাহ্মণাস্তথা রাজানশ্চ তে ঋষয়শ্চ এবম্ভূতা মৎপরাঃ পরাং গতিং যান্তীতি কিম্বক্তব্যং। অতস্ত্বমিমং রাজর্ষিরূপং দেহং প্রাপ্য নশ্বরং মাং ভজ
স্ব কিঞ্চ অনিত্যমধ্রুবং অসুখং সুখরহিতং ইমং মর্ত্যলোকং প্রাপ্য ক্ষণিকত্বাদ্বিলম্বমকুর্বন্ অসুখত্বাচ্চ সুখার্থোদ্যমং হিত্বা মামেব ভজস্বেত্যর্থঃ ॥ ৩৩ ॥

জনপ্রকারং দর্শয়ন্নুপসংহরতি । মন্মনা ইতি । ময্যেব মনো যস্য স মন্মনা ভব । তথা মদ্ভক্তঃ মদ্যাজী ভব । মৎপূজনশীলো ভব । মামেব চ নমস্কুরু । এবং মদ্ভক্তিপ্রকারৈর্মৎ-
পরায়ণঃ সন্ আত্মানং মনো ময়ি পরমেশ্বরে যুক্ত্বা সমাধায় মামেব পরমানন্দরূপমেষ্যসি প্রাপ্স্যসি ॥ ৩৪ ॥ নিজমৈশ্বর্যমাশ্চর্যং ভক্তেশ্চাদ্ভুতবৈভবং ।
নবমে রাজগুহ্যাখ্যে কৃপয়াবোচদচ্যুতঃ ॥ ❀ ॥ ইতি গীতাটীকায়াং সুবোধিন্যাং নবমোধ্যায়ঃ ॥ ❀ ॥ উক্তাঃ সংক্ষেপতঃ পূর্বং সপ্তমাদৌ বিভূতয়ঃ । দশমে তা বি-

শ্রী ৪২ মন্মনা ভব মদ্ভক্তো মদ্যাজী মাং নমস্কুরু । মামেবৈষ্যসি যুক্ত্বৈ- বমাত্মানং মৎপরায়ণঃ ॥ ৩৪ ॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎসু
গুহ্যযোগো নাম নবমোধ্যায়ঃ ॥ ❀ ॥ শ্রীভগবানুবাচ ॥ ভূয় এব ম- হাবাহো শৃণু মে পরমং বচঃ । যত্তেহং প্রীয়মাণায় বক্ষ্যামি হিতকাম্যয়া ॥ ১ ॥

তন্যন্তে সর্বত্রেশ্বরদৃষ্টয়ে ॥ এবং তাবৎ সপ্তমাদিভিস্ত্রিভিরধ্যায়ৈর্ভজনীয়মীশ্বরস্বরূপং নিরূপিতং তদ্বিভূতয়শ্চ সপ্তমে রসোহমপ্সু কৌন্তেয় ইত্যাদিনা সংক্ষেপতো দর্শিতাঃ । কিন্ত্বষ্টমে কিং তদ্ব্রহ্ম কিমধ্যাত্মমিত্যা-
দিনা প্রশ্নপূর্বকং সপ্তপদার্থরূপেণ তাঃ পরমেশ্বরস্য বিভূতয়ঃ সাধিভূতাধিদৈবং মাং যে বিদুঃ । নবমে তু অহং ক্রতুরহং যজ্ঞ ইত্যাদিনা তদ্বিভূতয়ো দর্শিতাঃ । ইদানীং তা এব বিভূতীঃ প্রপঞ্চ-
য়িষ্যন্ স্বস্য জগৎকারণত্বং কথনীয়ং প্রপঞ্চয়িষ্যন্ শ্রীভগবানুবাচ । ভূয় এবেতি । মহাবাহো যুদ্ধাদিস্বধর্মানুষ্ঠানং পরিচর্যায়াং ... হে মহাবাহো ভূয় এব পুনরপি মে পরমং বচঃ শৃণু । কু-
প্রকৃষ্টং পরমং পরমার্থনিষ্ঠং যদ্বচ সাম্প্রতং তেন প্রীতিপ্রাপ্ত্যর্থং হিতকাম্যয়া যদহং বক্ষ্যামি তচ্ছৃণু ॥ ১ ॥

ভজস্যাপিপুনর্বচনেহর্ষিস্থেয়ন্নহেতুমাহ:নমেবিদুরিতি: মমপ্রভবংপ্রভাবংজন্মরহিতস্যাপি: নানাবিভূতিভিরাবির্ভাবংসুরগণানাপি: মহর্ষয়োভৃগ্বাদয়োনবিদুঃ নজানন্তি:তত্রহেতুঃ অহংহিদেবানাং মহর্ষীণাঞ্চ
দিঃকারণং: সর্বশঃসর্বপ্রকারৈরুৎপাদকত্বেনবুদ্ধ্যাদিপ্রবর্ত্তকত্বেনচ: অতোমদনুগ্রহংবিনা মাংকেপিনজানন্তীত্যর্থঃ ॥ ২ ॥ এবম্ভূতাত্মজ্ঞানেফলমাহ: যোমামিতি: সর্বকারণত্বাদেবনাদি
নাস্যাদিঃকারণংযস্যতংঅনাদিং: অতএবাজংজন্মশূন্যংলোকানাংমহেশ্বরঞ্চমাংযোবেত্তি: সমর্ত্ত্যেষুসম্মোহরহিতঃসন সর্বপাপৈঃপ্রমুচ্যতে ॥ ৩ ॥ লোকমহেশ্বরত্বমেবস্ফুটয়তি: বুদ্ধিরিতি:
বুদ্ধিঃসারাসারবিবেকনৈপুণ্যং:জ্ঞানমাত্মবিষয়ং: অসম্মোহোব্যাকুলতাভাবঃ: ক্ষমাসহিষ্ণুত্বং: সত্যংযথার্থভাষণং: দমোবাহ্যেন্দ্রিয়সংযমঃ: শমোঽন্তঃকরণসংযমঃ: সুখমনুকূলবেদনীয়ং
দুঃখংতদ্বিপরীতং: ভবউদ্ভবঃ: অভাবঃতদ্বিপরীতঃ: ভয়ংত্রাসঃ: অভয়ংতদ্বিপরীতং। অস্যাপ্যেকস্যতত্ত্বহেতোঃ মত্তএবভবন্তীত্যনেনান্বয়ঃ ॥ ৪ ॥ কিঞ্চ অহিংসেতি: অহিংসাপরপীড়ানি

নমেবিদুঃসুরগণাঃপ্রভবন্নমহর্ষয়ঃ। অহমাদির্হিদেবানাম্ মহর্ষীণাঞ্চসর্বশঃ। ॥ ২ ॥ যোমামজমনাদিঞ্চবেত্তিলোক
মহেশ্বরং। অসংমূঢ়ঃসমর্ত্ত্যেষুসর্বপাপৈঃপ্রমুচ্যতে। ॥ ৩ ॥ বুদ্ধির্জ্ঞানমসম্মোহঃক্ষমাসত্যংদমঃশমঃ। সুখংদুঃখংভবোভা
বোভয়ঞ্চাভয়মেবচ ॥ ৪ ॥ অহিংসাসমতাতুষ্টিস্তপোদানংযশোয়শঃ। ভবন্তিভাবাভূতানাং মত্তএবপৃথগ্বিধাঃ। ॥
৫ ॥ মহর্ষয়ঃসপ্তপূর্বেচত্বারোমনবস্তথা। মদ্ভাবামানসাজাতাযেষাংলোকইমাঃপ্রজাঃ। ॥ ৬ ॥

বৃত্তিঃ: সমতারাগদ্বেষাদিরাহিত্যং: তুষ্টির্দৈবলব্ধেনসন্তোষঃ: তপঃশাস্ত্রীয়োদেহক্লেশমানং: দানংন্যায়ার্জিতস্যদ্রব্যস্যসৎপাত্রেঽর্পণং: যশঃসৎকীর্ত্তিঃ: অযশোঽপকীর্ত্তিঃ: এবম্বুদ্ধ্যাদয়ো
যোদয়ঃ:তদ্বিপরীতাশ্চবুদ্ধ্যাদয়োনানাবিধাভাবাঃপ্রাণিনাংমত্তএবভবন্তি ॥ ৫ ॥ কিঞ্চ মহর্ষয়ইতি: সপ্তমহর্ষয়োভৃগ্বাদয়ঃ: সপ্তব্রহ্মজ্ঞানেতেপ্রধানেনিশ্চয়ঃগীতাজৈয়াদিপু
রাণেপ্রসিদ্ধাঃ: ততোঽপ্যন্যেপূর্বেচত্বারোমহর্ষয়ঃসনকাদয়শ্চ: তথামনবঃস্বায়ম্ভুবাদয়ঃ: মদীয়োভাবোপ্রভাবোযেষু: তেহিরণ্যগর্ভাত্মনোমমৈবমনসঃসঙ্কল্পমাত্রাজ্জাতাঃ:
প্রভাবনাঃ: যেষাংভৃগ্বাদীনাংসনকাদীনাঞ্চজনাব্রাহ্মণাদ্যালোকেবর্ত্তমানা যথাযথংপুত্রপৌত্রাদিরূপাঃশিষ্যপ্রশিষ্যাদিরূপাঃপ্রজাঃপ্রজায়ন্তে ॥ ৬ ॥

মত্তো জাতিবিভূত্যাদিজ্ঞানফলমাহ : এতামিতি : এতাং পূর্ব্বোদিতাং মম বিভূতিং যোগঞ্চ ঐশ্বর্য্যলক্ষণং তত্ত্বতো যো বেত্তি স নিঃসংশয়েন যোগেন সম্যগ্দর্শনেন যুক্তো ভবতি : নাত্র সংশয়ঃ ॥ ৭ ॥
যথা বিভূতিযোগযোর্জ্ঞানেন সম্যগ্জ্ঞানাবাপ্তিস্তদ্দর্শয়তি : অহমিতি চতুর্ভিঃ : সর্ব্বস্য জগতঃ প্রভবঃ ব্রহ্মাদিমন্বাদিবিভূতিরূপেণোৎপত্তিহেতুঃ । মত্ত এব সর্ব্বং বুদ্ধিজ্ঞানমসম্মোহ ইত্যাদি
র্ব্বঃ প্রবর্ত্তত ইতি মত্বা মম সর্ব্বেশ্বরত্বং বিজ্ঞায় বিবেকিনঃ ভাবসমন্বিতাঃ প্রীতিযুক্তা মাং ভজন্তে ॥ ৮ ॥ প্রীতিপূর্ব্বকং ভজনমেবাহ : মচ্চিত্তা ইতি ময্যেব চিত্তং যেষাং মদ্গতাঃ প্রাণাঃ প্রাণা ইন্দ্রিয়াণি যেষাং তে ম
দ্গতপ্রাণাঃ : মৎপ্রীতিজীবিনা ইতি বা । এবম্ভূতা বুধাঃ অন্যোন্যং ন্যায়োপপত্তিশ্রুত্যাদিপ্রমাণৈঃ বোধয়ন্তঃ বুদ্ধ্যা মাং কীর্ত্তয়ন্তঃ কথয়ন্তঃ সন্তুষ্যন্তি : অতো মোদনেন তুষ্টিং যান্তি রমন্তি

এতাং বিভূতিং যোগঞ্চ মম যো বেত্তি তত্ত্বতঃ। সোঽবিকম্পেন যোগেন যুজ্যতে নাত্র সংশয়ঃ ॥ ৭ ॥ অহং সর্ব্বস্য প্রভবো মত্তঃ সর্ব্বং প্রবর্ত্ততে। ইতি ম
ত্বা ভজন্তে মাং বুধা ভাবসমন্বিতাঃ ॥ ৮ ॥ মচ্চিত্তা মদ্গতপ্রাণা বোধয়ন্তঃ পরস্পরং। কথয়ন্তশ্চ মাং নিত্যং তুষ্যন্তি চ রমন্তি চ ॥ ৯ ॥ তেষাং সততযুক্তানাং
গী৩ ভজতাং প্রীতিপূর্ব্বকং। দদামি বুদ্ধিযোগং তং যেন মামুপযান্তি তে ॥ ১০ ॥ তেষামেবানুকম্পার্থমহমজ্ঞানজং তমঃ। নাশয়াম্যাত্মভাবস্থো জ্ঞানদীপেন ভা
স্বতা ॥ ১১ ॥ অর্জ্জুন উবাচ ॥ পরং ব্রহ্ম পরং ধাম পবিত্রং পরমং ভবান। পুরুষং শাশ্বতং দিব্যমাদিদেবমজং বিভুং ॥ ১২ ॥

চ নির্বৃতিং যান্তি ॥ ৯ ॥ এবম্ভূতানাং সম্যগ্জ্ঞানমহং দদামীত্যাহ তেষামিতি : তেষাং সততযুক্তানাং মদ্যাসক্তচেতসাং প্রীতিপূর্ব্বকং ভজতাং বুদ্ধিরূপং যোগমুপায়ং দদামি : তমিতি কিং যেন তে মামুপযান্তি ॥ ১০ ॥ বুদ্ধিযো
গং দত্ত্বা তন্মাত্রপ্রতিবন্ধকং অজ্ঞানমপি নাশয়ামীত্যাহ : তেষামিতি : তেষামনুকম্পার্থমহমজ্ঞানজং তমঃ সংসারং নাশয়ামি : আত্মস্থিতঃ সন্ কেন বা সাধনেন বা তমো নাশয়ামীত্যাহ : ভা
স্বতা : বুদ্ধিবৃত্তৌ স্থিতঃ সন্ ভাস্বতা জ্ঞানলক্ষণেন দীপেন নাশয়ামি ॥ ১১ ॥ সংক্ষেপেণোক্তামাত্মবিভূতিং বিস্তরেণ জিজ্ঞাসুরর্জ্জুন উবাচ । পরং ব্রহ্মেতি সপ্তভিঃ : পরমিতি : প
রং ব্রহ্ম : ধাম আশ্রয়ঃ পরমং পবিত্রঞ্চ ভবানেব : যতঃ শাশ্বতং নিত্যং পুরুষং তথা দিব্যং দ্যোতনাত্মকং স্বয়ং প্রকাশং আদিদেবং দেবানামাদিভূতং তথাজমজন্মানং বিভুং ব্যাপকং ত্বামাহুরিত্যন্বয়ঃ ॥ ১২ ॥

কিঞ্চকেবলম্ঋষয়স্ত্বামাদয়শ্চসর্ব্বে: দেবর্ষিশ্চনারদশ্চ: অসিতশ্চদেবলশ্চ: ব্যাসশ্চস্বয়ংত্বমেবসাক্ষান্মহ্যংব্রবীষি ॥ ১৩ ॥ অতোমমেদানীংত্বদৈশ্বর্য্যেঅসম্ভাবনা নিবৃত্তেত্যাহ: সর্ব্বমেতদিতি: এতত্ত্বানে
র পর্য্যন্তেযৎকথয়সিসর্ব্বমপিসত্যংমন্যে: যন্মাংপ্রতিকথয়সি: নামবিদুশ্চস্বস্বজ্ঞানাভাবাদিতিদপিসত্যমেবমন্যেইত্যাহ: হেভগবংস্তব ব্যক্তিংদেবানবিদুশ্চ অস্মদনুগ্রহার্থংতবযমভিব্যক্তিংহিতংনজানন্তি: দানব
শ্চাস্মন্নিগ্রহার্থমিতিতবংবিদুরেব ॥ ১৪ ॥ কিন্তুহিস্বয়মিতি: স্বয়মেবত্বমাত্মানংবেত্থজানাসিনান্যশ্চ আত্মনাস্বেনৈবসাধনান্তরেণ: অথাদরেণবহুধাসম্বোধয়তি: হেপুরুষোত্তম: পুরুষোত্তমত্বেনহেতুগর্ভানি

আহুস্ত্বামৃষয়ঃসর্ব্বেদেবর্ষির্নারদস্তথা । অসিতোদেবলোব্যাস ঃস্বয়ঞ্চৈবব্রবীষিমে ॥ ১৩ ॥ সর্ব্বমেতদৃতংমন্যেযন্মাংবদসিকেশব ।
নহিতেভগবন্ব্যক্তিংবিদুর্দ্দেবানদানবাঃ ॥ ১৪ ॥ স্বয়মেবাত্ম নাত্মানংবেত্থত্বংপুরুষোত্তম । ভূতভাবনভূতেশদেবদেবজগৎপতে ।
॥ ১৫ ॥ বক্তুমর্হস্যশেষেণদিব্যাহ্যাত্মবিভূতয়ঃ । যাভি র্বিভূতিভির্লোকানিমাংস্ত্বংব্যাপ্যতিষ্ঠসি ॥ ১৬ ॥
কথংবিদ্যামহংযোগিংস্ত্বাংসদাপরিচিন্তয়ন্ । কেষুকেষুচভাবেষুচিন্ত্যোসিভগবন্ময়া ॥ ১৭ ॥

বিশেষণানিতেআহ: হেভূতভাবনভূতোৎপাদক: হেভূতেশভূতনিয়ন্তঃ দেবানামাদিত্যানাংদেবপ্রকাশক: জগৎপতেজগৎপালক: যস্মাত্ত্বমতীবোৎকৃষ্টমেবংবেৎসি: নান্যোদেবাদয়শ্চ ॥ ১৫ ॥ তস্মাদ্বক্তুমর্হস্যশেষেণেতি: আত্মনস্তব
দিব্যাঅদ্ভুতাযাবিভূতয়শ্চতাশ্চসর্ব্বাবক্তুংত্বমেবার্হসি: যোগ্যোসিযাভিরিতি: বিভূতীনাংবিশেষণং: পুনঃ ... র্থঃ ॥ ১৬ ॥ কথনপ্রয়োজনংদর্শয়ন্প্রার্থয়তে: কথমিতিযোগিন্কথংবিদ্যাংবিজানীয়াম্ সদাপরিচি
ন্তয়ন্অহংত্বাংবিদ্যাংজানীয়াং: কিঞ্চতত্ত্বেনচিন্ত্যোসি: কেষুকেষুপদার্থেষুময়াচিন্ত্যোসি ॥ ১৭ ॥

ন্দরবহির্ম্মুখে চিত্তে অত্র বিভূতিভেদেন ত্বচ্চিন্তনং যথা ভবতি তথা বিস্তরেণ কথয় ইত্যাহ : বিস্তরেণেতি : আত্মনস্তব যোগং : সর্ব্বজ্ঞত্ব সর্ব্বশক্তিত্বাদিলক্ষণং যোগৈশ্বর্য্যং : বিভূতিঞ্চ বিস্তরেণোক্তং পুনশ্চ কথয় : যতস্ত্বদ্বাক্য
মমৃতরূপং : শৃণ্বতো মম তৃপ্তির্ন্নাস্তি ॥ ১৮ ॥ এবং প্রার্থিতঃ সন্ ভগবানুবাচ : হন্তেত্যাদি : হন্তেত্যনুকম্পাসম্বোধনে : দিব্যা যা মম বিভূতয়ঃ তাঃ প্রাধান্যেন তব কথয়িষ্যামি : যতো মম বিভূতিবি
স্তরস্য মদীয়স্যান্তো নাস্তি । অতঃ প্রধানভূতাঃ কাশ্চিদ্বক্ষ্যামি ॥ ১৯ ॥ তত্র প্রথমমৈশ্বরং রূপং কথয়তি অহমিতি : হে গুড়াকেশ : সর্ব্বেষাং ভূতানামাশয়েষু অন্তঃকরণেষু সর্ব্বজ্ঞত্বাদিগুণৈর্ন্নিয়ন্তৃত্বেনাবস্থিতঃ পরমাত্মা
অহং : আদির্জন্ম মধ্যং স্থিতিঃ অন্তশ্চ সংহারঃ সর্ব্বভূতানাং জন্মাদিহেতুশ্চাহমিত্যর্থঃ ॥ ২০ ॥ ইদানীং বিভূতীঃ কথয়তি : আদিত্যানামিত্যারভ্য সমাপ্তি : আদিত্যানাং দ্বাদশাদিত্যানাং বিষ্ণুর্ব্বামননামাহং : জ্যোতিষাং প্রকাশ

বিস্তরেণাত্মনো যোগং বিভূতিঞ্চ জনার্দ্দন । ভূয়ঃ কথয় তৃপ্তির্হি শৃণ্বতো নাস্তি মেঽমৃতং ॥ ১৮ ॥ ভগবানুবাচ ॥ হন্ত তে কথয়িষ্যামি দিব্যা হ্যাত্মবিভূ

শ্রী ৪৪ তয়ঃ । প্রাধান্যতঃ কুরুশ্রেষ্ঠ নাস্ত্যন্তো বিস্তরস্য মে ॥ ১৯ ॥ অহমা ত্মা গুড়াকেশ সর্ব্বভূতাশয়স্থিতঃ । অহমাদিশ্চ মধ্যঞ্চ ভূতানামন্ত এব চ ॥

২০ ॥ আদিত্যানামহং বিষ্ণুর্জ্যোতিষাং রবিরংশুমান্ । মরীচির্ম্মরু তামস্মি নক্ষত্রাণামহং শশী ॥ ২১ ॥ বেদানাং সামবেদোঽস্মি দেবানামস্মি বা

সবঃ । ইন্দ্রিয়াণাং মনশ্চাস্মি ভূতানামস্মি চেতনা ॥ ২২ ॥ রুদ্রাণাং শঙ্করশ্চাস্মি বিত্তেশো যক্ষরক্ষসাং । বসূনাং পাবকশ্চাস্মি মেরুঃ শিখরিণামহং ॥ ২৩ ॥

কানাং মধ্যে অংশুমান্ রবিরহং ব্যাপিরশ্মিযুক্তো রবিরহমর্থাৎ : মরুতাং বায়ূনাং মধ্যে মরীচির্ন্নামাস্মি : মরুতঃ সপ্ত সপ্তগণা নাম দেববিশেষাস্তেষাং মধ্যে নক্ষত্রাণাঞ্চন্দ্রোঽহং : অত্রাদিত্যানামহং বিষ্ণুরিত্যাদিষু প্রায়শো নির্দ্ধারণে ষষ্ঠী : ক্বচিচ্চ ভূ
তানামস্মি চেতনেত্যাদিষু সম্বন্ধে ষষ্ঠী : অতস্তত্র তত্র দর্শয়িষ্যামঃ : বিষ্ণুরিত্যাদিষু তাভ্যোঽপি প্রাভবমাত্রাতিবিবক্ষয়া বিভূতিত্বেন নির্দ্দিশ্যতে : অতঃ পরং ... যথাযোগ্যং স্পষ্টার্থত্বাৎ কিঞ্চিদ্ব্যাখ্যাস্যামঃ ॥ ২১ ॥ বেদানামিতি বাসব ইন্দ্রঃ ভূ
তানাং সর্ব্বপ্রাণিনাং চেতনা জ্ঞানশক্তিরহমস্মি ॥ ২২ ॥ রুদ্রাণামিতি : রাক্ষসানামপি রুদ্রত্বাদিসাম্যাদ্ যক্ষৈঃ সহৈকীভূয় নির্দ্দেশঃ । তেষাং মধ্যে বিত্তেশঃ কুবেরোঽস্মি : পাবকোঽগ্নিঃ : শিখরিণাং শিখরবতাং পর্ব্বতানাং মধ্যে মেরুরহং ॥ ২৩ ॥

পুরোধসামিতি । দেবপুরোহিতানাং মধ্যে বৃহস্পতিম্মাং বিদ্ধি । সেনানীনাং মধ্যে দেবসেনাপতিঃ স্কন্দোঽহমস্মি । সরসাং স্থিরজলানাং মধ্যে সমুদ্রোঽস্মি ॥ ২৪ ॥
মহর্ষীণামিতি । মহর্ষীণাং মধ্যে ভৃগুরহং । গিরাং বাচাং মধ্যে একমক্ষরমোঙ্কারাখ্যং পদমস্মি ॥ ২৫ ॥ অশ্বত্থ ইতি । দেবাশ্চ তে ঋষয়শ্চ মন্ত্রদর্শনেন ঋষিত্বং প্রাপ্তাস্তেষাং মধ্যে নারদোঽস্মি । সি-
দ্ধানামুৎপত্তিত এবাধিগতপরমার্থানাং কপিলাখ্যো মুনিরহমস্মি ॥ ২৬ ॥ উচ্চৈঃশ্রবসমিতি । অমৃতার্থক্ষীরোদধিমথনে উদ্ভূতমুচ্চৈঃশ্রবসমশ্বং মদ্বিভূতিং বিদ্ধি । অমৃতোদ্ভবমিত্যনেন
ঐরাবতোঽপি সম্বধ্যতে । নরাধিপং রাজানং মাং বিদ্ধি ॥ ২৭ ॥ আয়ুধানামিতি । বজ্রোঽস্মি । কামান্ দোগ্ধীতি কামধুক্ । প্রজনঃ প্রজোৎপত্তিহেতুঃ কন্দর্পঃ কামোঽস্মি । ন কেবলং সম্ভোগমা-

পুরোধসাঞ্চ মুখ্যম্মাং বিদ্ধি পার্থ বৃহস্পতিং । সেনানীনামহং স্কন্দঃ সরসা-
মস্মি সাগরঃ ॥ ২৪ ॥ মহর্ষীণাং ভৃগুরহং গিরামস্ম্যেকমক্ষরং । যজ্ঞানাং জপযজ্ঞো-
ঽস্মি স্থাবরাণাং হিমালয়ঃ ॥ ২৫ ॥ অশ্বত্থঃ সর্ব্ববৃক্ষাণাং দেবর্ষীণাঞ্চ নারদঃ
। গন্ধর্ব্বাণাং চিত্ররথঃ সিদ্ধানাং কপিলো মুনিঃ ॥ ২৬ ॥ উচ্চৈঃশ্রবসমশ্বানাং বিদ্ধি
মামমৃতোদ্ভবং । ঐরাবতং গজেন্দ্রাণাং নরাণাঞ্চ নরাধিপং ॥ ২৭ ॥ আয়ুধানাম-
হং বজ্রং ধেনূনামস্মি কামধুক্ । প্রজনশ্চাস্মি কন্দর্পঃ সর্পাণামস্মি বাসুকিঃ ॥ ২৮ ॥
অনন্তশ্চাস্মি নাগানাং বরুণো যাদসামহং । পিতৄণামর্য্যমা চাস্মি যমঃ সংযমতাম-
হং ॥ ২৯ ॥ প্রহ্লাদশ্চাস্মি দৈত্যানাং কালঃ কলয়তামহং । মৃগাণাঞ্চ মৃগেন্দ্রোঽহং বৈনতেয়শ্চ পক্ষিণাং ॥ ৩০ ॥

ত্রপ্রধানঃ কামো মদ্বিভূতিঃ । অশাস্ত্রীয়ত্বাৎ । সর্পাণাং সবিষাণাং রাজা বাসুকিরস্মি ॥ ২৮ ॥ অনন্ত ইতি । নাগানাং নির্ব্বিষাণাং রাজা অনন্তঃ শেষোঽস্মি । যাদসাং জলচরাণাং রাজা বরুণোঽস্মি ।
পিতৄণাং রাজা অর্য্যমাস্মি । সংযমতাং নিয়মং কুর্ব্বতাং মধ্যে যমোঽস্মি ॥ ২৯ ॥ প্রহ্লাদ ইতি । কলয়তাং বশীকুর্ব্বতাং চালয়তাং মধ্যে কালোঽহমস্মি । মৃগেন্দ্রঃ সিংহঃ ॥ ৩০ ॥

পবনেতি : পবতাং পাবয়িতৄণাং বেগবতাং বা মধ্যে বায়ুরহমস্মি : রামঃ দাশরথিঃ : ঝষানাং মৎস্যাদীনাং মধ্যে মকরো নাম মৎস্যজাতিবিশেষঃ : অহং : স্রোতসাং প্রবাহোদকানাং মধ্যে ভাগীরথী ॥ ৩১ ॥
সর্গাণামিতি : সৃজ্যন্ত ইতি সর্গা আকাশাদয়ঃ তেষামাদিরন্তশ্চ মধ্যঞ্চাহমেব : অহমাদিশ্চ মধ্যঞ্চেত্যত্র সৃষ্ট্যাদি কর্তৃত্বং পরমেশ্বরস্যোক্তং : অত্র সৃষ্টিপ্রলয়স্থিতয়ো মদ্বিভূতিত্বেন ধ্যেয়া ইতি বিশেষঃ
অধ্যাত্মেতি : অধ্যাত্মবিদ্যা আত্মবিদ্যা প্রবদতাং বাদিনাং সম্বন্ধিনো বাদজল্পবিতণ্ডাখ্যাস্তিস্রঃ কথাঃ প্রসিদ্ধাঃ : তাসাং মধ্যে বাদোঽহং : যত্র দ্বাভ্যামপি প্রমাণতস্তর্কতশ্চ স্বপক্ষঃ স্থাপ্যতে :
পরপক্ষশ্ছলজাতিনিগ্রহস্থানৈর্দূষ্যতে স জল্পো নাম : যত্রৈকঃ স্বপক্ষং স্থাপয়তি : অন্যস্তু ছলজাতিনিগ্রহস্থানৈঃ তৎপক্ষং দূষয়তি : ন তু স্বপক্ষং স্থাপয়তি সা বিতণ্ডা নাম কথা : তত্র জল্পবিতণ্ডয়োর্বিজিগী-

পবনঃ পবতামস্মি রামঃ শস্ত্রভৃতামহং । ঝষানাং মকরশ্চাস্মি স্রোতসামস্মি জাহ্নবী ॥ ৩১ ॥ সর্গাণামাদিরন্তশ্চ মধ্যঞ্চৈবাহমর্জ্জুন ।
দ্বী ৪৬ অধ্যাত্মবিদ্যা বিদ্যানাং বাদঃ প্রবদতামহং ॥ ৩২ ॥ অক্ষরাণামকারোঽস্মি দ্বন্দ্বঃ সামাসিকস্য চ । অহমেবাক্ষয়ঃ কালো ধাতাহং বি-
শ্বতোমুখঃ ॥ ৩৩ ॥ মৃত্যুঃ সর্ব্বহরশ্চাহমুদ্ভবশ্চ ভবিষ্যতাং । কীর্ত্তিঃ শ্রীর্বাক্চ নারীণাং স্মৃতির্মেধা ধৃতিঃ ক্ষমা ॥ ৩৪ ॥

ষমানয়োর্ব্বাদিনোঃ শক্তিমাত্রপরীক্ষামাত্রফলে : বাদস্তু বীতরাগয়োঃ শিষ্যাচার্য্যয়োরন্যয়োর্ব্বা তত্ত্বনিরূপণফলঃ অতোঽসৌ শ্রেষ্ঠত্বান্মম বিভূতিরিত্যর্থঃ ॥ ৩২ ॥ অক্ষরাণামিতি : অক্ষরাণাং বর্ণানাং মধ্যে
যে অকারোঽস্মি তস্য সর্ব্ববাঙ্ময়ত্বেন শ্রেষ্ঠত্বাৎ । তথা চ শ্রুতিঃ : অকারো বৈ সর্ব্বা বাক্ সৈষা স্পর্শোষ্মভির্ব্যজ্যমানা বহ্বী নানারূপা ভবতীতি : সামাসিকস্য সমাসসমূহস্য মধ্যে দ্ব-
ন্দ্বো নাম দ্বন্দ্বাদিরিতি সমাসোঽস্মি উভয়পদপ্রধানত্বেন শ্রেষ্ঠত্বাৎ : অক্ষয়ঃ প্রবাহরূপঃ কালোঽহমেব : কালঃ কলয়তামস্মীত্যত্র সংহারকর্ত্তৃত্বেন কালঃ সর্ব্বসংহর্ত্তা রূপঃ কালোক্তঃ : সর্ব্বতোমুখো বিশ্বতো-
মুখঃ : অক্ষয়ঃ প্রবাহরূপো কালোহক্ষয়ঃ কালোঽত্র ভক্তিবিশেষঃ : কর্ম্মফলবিধাতৄণাং মধ্যে বিশ্বতোমুখঃ সর্ব্বকর্ম্মফলবিধাতাহমিত্যর্থঃ ॥ ৩৩ ॥ মৃত্যুরিত্যাদি : সংহারকারিণাং মধ্যে সর্ব্বসংহারো মৃ-
ত্যুরহং : ভবিষ্যতাং ভাবিকল্যাণানাং প্রাণিনামুদ্ভবঃ অভ্যুদয়োঽহং : নারীণাং মধ্যে : কীর্ত্ত্যাদ্যাঃ সপ্ত দেবতারূপাঃ স্ত্রিয়ঃ অহং : যাসামাভাসমাত্রযোগেন প্রাণিনঃ শ্লাঘ্যা ভবন্তি তাঃ কীর্ত্ত্যাদ্যাঃ স্ত্রিয়ো
মদ্বিভূতয়ঃ ॥ ৩৪ ॥

বৃহদিতি : ত্বামিদ্ধিহবামহে ইত্যস্যামৃচি গীয়মানং বৃহৎসাম : তেনেন্দ্রঃ সর্ব্বেশ্বরত্বেন স্তূয়ত ইতি শ্রেষ্ঠং । ছন্দোবিশিষ্টানাং মন্ত্রাণাং গায়ত্রীমন্ত্রোহং ২ দ্বিজোৎপাদকত্বেন : সোমাহরণেন চ শ্রেষ্ঠত্বাৎ :
কুসুমাকরো বসন্তঃ ॥ ৩৫ ॥ দ্যূতমিতি : ছলয়তাং অন্যোন্যবঞ্চনপরাণাং সম্বন্ধি দ্যূতমস্মি : তেজস্বিনাং প্রভাববতাং তেজঃ প্রভাবোস্মি : জেতৄণাং জয়োস্মি : ব্যবসায়িনাং উদ্যমবতাং ব্যবসায়ঃ উদ্যমোস্মি :
সত্ত্ববতাং সাত্ত্বিকানাং সত্ত্বং ॥ ৩৬ ॥ বৃষ্ণীনাং বাসুদেবোস্মি : বাসুদেবো যোহং ত্বামুপদিশামি : যদ্যপি বাসুদেবস্য বাসুদেবঃ স্বাত্মেতি তথাপ্যস্মিন্নভেদেনাবস্থিতস্য বচনমেতদিতি দ্রষ্টব্যং : ধন
ঞ্জয়স্ত্বমেব মদ্বিভূতিঃ : মুনীনাং বেদমননশীলানাং বেদব্যাসোস্মি : কবীনাং জ্ঞানদর্শিনাং মধ্যে উশনানাম কবিঃ শুক্রঃ ॥ ৩৭ ॥ দণ্ড ইতি : দময়তাং দমনকর্ত্তৄণাং সম্বন্ধি দণ্ডোস্মি ২

বৃহৎসাম তথা সাম্নাং গায়ত্রীচ্ছন্দসামহং ২ মাসানাং মার্গশীর্ষোহহমৃ
তূনাং কুসুমাকরঃ ॥ ৩৫ ॥ দ্যূতং ছলয়তামস্মি তেজস্তেজস্বিনামহং ২
জয়োস্মি ব্যবসায়োস্মি সত্ত্বং সত্ত্ববতামহং ॥ ৩৬ ॥ বৃষ্ণীনাং বাসুদেবো
স্মি পাণ্ডবানাং ধনঞ্জয়ঃ । মুনীনামপ্যহং ব্যাসঃ কবীনামুশনা ক
বিঃ ॥ ৩৭ ॥ দণ্ডো দময়তামস্মি নীতিরস্মি জিগীষতাং ২ মৌনং চৈবা
স্মি গুহ্যানাং জ্ঞানং জ্ঞানবতামহং ॥ ৩৮ ॥ যচ্চাপি সর্ব্বভূতানাং বীজং তদহ
মর্জ্জুন ২ ন তদস্তি বিনা যৎ স্যান্ময়া ভূতং চরাচরং ॥ ৩৯ ॥ নান্তোস্তি মম দিব্যানাং বিভূতীনাং পরন্তপ । এষ তূদ্দেশতঃ প্রোক্তো বিভূতের্বিস্তরো ময়া ॥ ৪০ ॥

যেন অসংযতা অপি সংযতা ভবন্তি : মদ্বিভূতিঃ : জিগীষতাং জয়েচ্ছূনাং সম্বন্ধিনাং সামাদ্যুপায়া নীতিরস্মি : গুহ্যানাং গোপ্যানাং গোপনহেতুর্মৌনাচরণমস্মি : নহি তূষ্ণীং স্থিতস্যাভিপ্রায়ো
জ্ঞায়তে : জ্ঞানবতাং তত্ত্বজ্ঞানিনাং যজ্জ্ঞানং তদহমস্মি ॥ ৩৮ ॥ যচ্চাপীতি : যদপি সর্ব্বভূতানাং বীজং প্ররোহকারণং তদহং অর্জ্জুন : ময়া বিনা যৎ স্যাৎ ভবেৎ : ত
দ্ চরাচরং ভূতং নাস্ত্যেবেতি ॥ ৩৯ ॥ প্রকরণার্থমুপসংহরতি : নান্তোস্তীতি : অনন্তত্বাদ্বিভূতীনাং : এতাঃ সাকল্যেন বক্তুং ন শক্যন্তে এষ তু বিভূতের্বিস্তর উদ্দেশতঃ প্রোক্তঃ : ৪০ ॥

৪৬

প্রনষ্টস্যাকাঙ্ক্ষাপ্রতি কথঞ্চিৎসাকাল্যেন কথয়ন্তি : যদ্যদিতি : বিভূতিমৎ ঐশ্বর্য্যযুক্তং শ্রীমৎ সম্পত্তিমৎ ঊর্জ্জিতং কেনাপি প্রভাববলাদিনাধিক্যেন বা তৎশব্দিতং : যদ্যৎ সত্ত্বং তত্তৎ সর্ব্বং তত্তদেব মম তেজসঃ প্রভা-
রংশেনাংশেন সম্ভূতং জানীহি ॥ ৪১ ॥ অথবা কিমনেন পরিচ্ছিন্নদর্শনেন সর্ব্বত্র মদ্দৃষ্টিমেব কুর্য্যাদিত্যাহ : অথবেতি : বহুনাষ্টেন পৃথগ্জ্ঞাতেন কিং কার্য্যং : তস্মাদিদং সর্ব্বং জগৎ একাংশেন একদেশমাত্রেণ
বিষ্টভ্য ধৃত্বা ব্যাপ্য বা অহমেবাবস্থিতঃ : ন মত্তো ব্যতিরিক্তং কিঞ্চিদস্তি : পাদোঽস্য বিশ্বা ভূতানীতি শ্রুতেঃ ॥ ৪২ ॥ * ॥ জন্মিয়দ্রাষ্টত্বপিত্তে বহিষ্কারতিসত্যপি । জগদ্ব্যাপ্তিবিধানায় বিভূতিং দশ-
মে ব্রবীৎ ॥ * ॥ ইতি গীতাটীকায়াং সুবোধিন্যাং দশমোঽধ্যায়ঃ ॥ * ॥ বিভূতির্বৈরপ্রোক্তঃ প্রাপ্য হর্ষিতঃ । দিদৃক্ষুর্বিশ্বরূপং স্বদর্শয়ৎ ॥ পূর্ব্বাধ্যায়ান্তে বিষ্টভ্যাহমিদমিতি বিশ্ব-

গী ৪৬ যদ্যদ্বিভূতিমৎ সত্ত্বং শ্রীমদূর্জ্জিতমেব বা । তত্তদেবাবগচ্ছ ত্বং মম তেজোং- শসম্ভবং ॥ ৪১ ॥ অথবা বহুনৈতেন কিং জ্ঞাতেন তবার্জ্জুন । বিষ্টভ্যাহমি-
দং কৃৎস্নমেকাংশেন স্থিতো জগৎ ॥ ৪২ ॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎ- সু বিভূতিযোগো নাম দশমোঽধ্যায়ঃ ॥ * ॥ অর্জ্জুন উবাচ ॥ মদনু-
গ্রহায় পরমং গুহ্যমধ্যাত্মসংজ্ঞিতং । যত্ত্বয়োক্তং বচস্তেন মোহোঽয়ং বিগতো মম ॥ ১ ॥ ভবাপ্যয়ৌ হি ভূতানাং শ্রুতৌ বিস্তরশো ময়া । ত্বত্তঃ কমলপত্রাক্ষ মাহাত্ম্যম-
পি চাব্যয়ং ———॥———২———॥

রূপং পার্থঃ স্বরূপং পাপপরিক্ষিপ্তং তদ্দিদৃক্ষুঃ প্রার্থয়তে জগত্তিনন্দনঃ অর্জ্জুন উবাচ : মদনুগ্রহায়েতি চতুর্ভিঃ : মদিতি : মমানুগ্রহায় শোকনিবৃত্তয়ে পরমং পরমার্থনিষ্ঠং গুহ্যং গোপ্যমধ্যাত্মসংজ্ঞিতং আত্মানাত্মবিবেক-
বিষয়ং যত্ত্বয়োক্তং বচঃ অশোচ্যানন্বশোচস্ত্বমিত্যাদি ষষ্ঠাধ্যায়পর্য্যন্তং ত্বয়োক্তং তেন মমায়ং মোহো হতোঽহং হন্তা এতে হন্যন্তে ইতি লক্ষণো ভ্রমো বিগতঃ বিনষ্টঃ আত্মনঃ কর্ত্তৃত্বাদ্যভাবোক্তেঃ ॥ ১ ॥ কিঞ্চ : ভবাপ্যয়ৌ
যৌ সৃষ্টিপ্রলয়ৌ ভূতঃ সকাশাদেব ভূতৌ : অহং কৃৎস্নস্য জগতঃ প্রভবঃ প্রলয়স্তথেত্যাদৌ বিস্তরশঃ পুনঃ পুনঃ : কমলপত্রাক্ষ জগৎস্বপ্রসবেঽবিশানে অক্ষিণী যস্য তৎ : হে কমলপত্রাক্ষ : মাহাত্ম্যমপি চাব্যয়মক্ষয়ং : এতচ্চ বিশ্বসৃষ্ট্যাদি-
কর্তৃত্বেঽপি সর্ব্বনিয়ন্তৃত্বেঽপি বন্ধমোক্ষবিচিত্রফলদাতৃত্বেঽপি অবিকারিত্ববৈষম্যাসাক্ষিত্বোদাসীন্যাদিলক্ষণমপরিমিতং মহিমত্বশ্রুতং : অব্যক্তমূর্ত্তিনা ময়া ততমিদং সর্ব্বং ময়ি সর্ব্বমিদং প্রোতমিতি : ময়া ততমিদং সর্ব্বমিতি : ন চ মাং তানি কর্ম্মাণি
নিবধ্নন্তি : সমোঽহং সর্ব্বভূতেষু ইত্যাদিনা : অতস্তৎ পরমং ব্রহ্মাত্মতত্ত্বং নামহং কীর্ত্তিতমিদং মদীয়ো মোহো বিগতঃ ইত্যভিপ্রায়ঃ ॥ ২ ॥

কিঞ্চ যদ্যপ্যেতদেবং · ত্বয়াথ্যয়োহি ত্বন্নামিত্যাদিম্যয়া শ্রুতো যথা চেদানীমাত্মানং ত্বমাত্থ · বিষ্টভ্যাহমিদং কৃৎস্নমেকাংশেন স্থিতো জগদিত্যেবং কথয়সি · হে পরমেশ্বর এবমেতদযথার্থং বিশ্বাসো নাস্তীহ
র্থঃ তথাপি · হে পুরুষোত্তম তবৈশ্বরং জ্ঞানৈশ্বর্য্যবলবীর্য্যশক্তিতেজোভিঃ সম্পন্নং রূপং কৌতূহলাদ্দ্রষ্টুমিচ্ছামি ॥৩॥ নচাহং দ্রষ্টুমীশ্বরোঽস্মীতি ত্বয়া রূপং দর্শয়িতব্যং · কিন্তু যদি মন্যসে তাহি · যোগিনামীশ্বর যোগে
শ্বর যোগীশ্বর ময়াপি নিজরূপং দ্রষ্টুমিতি শক্যং মন্যসে যদি ততস্তর্হি তদ্রূপমাত্মানমব্যয়ং নিত্যং মম দর্শয় ॥৪॥ এবং প্রার্থিতঃ সন্স্বরূপং দর্শয়িষ্যন্ · সাবধানো ভবেত্যর্জ্জুনমভিমুখীকরোতি · পশ্যেতিচতুর্ভিঃ ·
পশ্যেতি · রূপাণ্যথ কথয়েপি নানাবিধান্যরূপাণীতি বক্ষ্যচরং । শতশোঽথ সহস্রশ ইতি অনেকপ্রকারাণি · অলৌকিকানি · মম রূপাণি পশ্য · বর্ণাঃ শুক্লাদয়ঃ আকৃতয়োঽবয়বসংস্থানবিশেষাঃ · নানা অনেকবর্ণা আ

এবমেতদ্যথাত্থ ত্বমাত্মানং পরমেশ্বর । দ্রষ্টুমিচ্ছামি তে রূপমৈশ্বর্য্যং পুরুষোত্তম ॥৩॥ মন্যসে যদি তচ্ছক্যং ময়া দ্রষ্টুমিতি প্রভো । যো
গেশ্বর ততো মে ত্বং দর্শয়াত্মানমব্যয়ং ॥৪॥ ভগবানুবাচ ॥ পশ্য মে পার্থ রূপাণি শতশোঽথ সহস্রশঃ । নানাবিধানি দিব্যানি নানাবর্ণা
কৃতীনি চ ॥৫॥ পশ্যাদিত্যান্বসূন্রুদ্রানশ্বিনৌ মরুতস্তথা । বহূন্যদৃষ্টপূর্ব্বাণি পশ্যাশ্চর্য্যাণি ভারত ॥৬॥ ইহৈকস্থং জগৎকৃৎস্নং পশ্যা
দ্য সচরাচরং । মম দেহে গুড়াকেশ যচ্চান্যদ্দ্রষ্টুমিচ্ছসি ॥৭॥ নতু মাং শক্যসে দ্রষ্টুমনেনৈব স্বচক্ষুষা । দিব্যং দদামি তে চক্ষুঃ পশ্য মে যোগমৈশ্বরং ॥৮॥

কৃতয়ো যেষাং তানি নানাবর্ণাকৃতীনি ॥৫॥ আদিত্যাদীন্মম দেহে পশ্য · মরুতশ্চৈকোনপঞ্চাশদ্দেববিশেষাঃ · অদৃষ্টপূর্ব্বাণি · ত্বয়া বান্যেন বা পূর্ব্বমদৃষ্টানি ॥৬॥ কিঞ্চ ইহৈকস্থমিতি · তত্র তত্র পরিভ্রমতা বর্ষকোটিভিরপি দ্র
ষ্টুমশক্যং · কৃৎস্নমপি চরাচরসহিতং জগদিহাস্মিন্মম দেহে অবয়বরূপেণ একত্রস্থিতং · অদ্য অধুনৈব পশ্য · যচ্চান্যজ্জগদাশ্রয়ভূতং · কারণরূপং জগতস্থায়স্থাবিশেষাদিকং জয়পরাজয়াদিকং বা যদন্যদ্দ্রষ্টুমিচ্ছসি তদ
পি পশ্য ॥৭॥ যত্ত্বন্যদ্দ্রষ্টুমিচ্ছসীত্যুক্তং তত্রাহ · নত্বিতি · অনেনৈব স্বীয়েন চর্ম্মচক্ষুষা মাং দ্রষ্টুং ন শক্যসে · শক্তো ন ভবিষ্যসি · অতো দিব্যমলৌকিকং জ্ঞানাত্মকং চক্ষুস্তে দদামি · তেন মমৈশ্বরং
অসাধারণং যোগং যুক্তিমঘটনঘটনাসামর্থ্যং পশ্য ॥ ৮ ॥

এবমুক্তো ভগবানর্জ্জুনায় স্বরূপং দর্শিতবান্ উচ্চৈঃ রূপং হর্ষেণ শ্রীধর্ম্মমহানষ্টবিদ্যাপিতরানন্তী সমর্থমেবম্মক্তোতাদিতি তিষ্টতি পঞ্চশ্লোকৈঃ তত্র সঞ্জয় উবাচ এবমিতি হে রাজন্ উক্ত্বা সহাংশাসৌ যো
গেশ্বরশ্চ তিহরিঃ পরমমৈশ্বর্য্যং রূপং দর্শিতবান্ ॥ ৯ ॥ কথম্ভূতমিত্যত আহ অনেকবক্ত্রনয়নমিতি অনেকানি বক্ত্রাণি নয়নানি চ যস্মিন্ অনেকানামদ্ভুতানাং দর্শনং যস্মিন্ অনেকানি দিব্যানি আ
ভরণানি যস্মিন্ দিব্যান্যনেকানি উদ্যতান্যায়ুধানি যস্মিন্ ॥ ১০ ॥ কিঞ্চ দিব্যমাল্যাম্বরধরমিতি দিব্যা গন্ধা যস্য তাদৃশমনুলেপনং যস্য সর্ব্বাশ্চর্য্যময়ং অনেকাশ্চর্য্যপ্রায়ং
দেবং দ্যোতনাত্মকং অনন্তমপরিচ্ছিন্নং বিশ্বতঃ সর্ব্বতো মুখানি যস্য ॥ ১১ ॥ বিশ্বরূপদীপ্তের্নিরূপমমাহ দিবীতি দিবি আকাশে সূর্য্যসহস্রস্য [illegible] যুগপদুত্থিতা প্রভা ভবে
দ্ যদি মহাত্মনো বিশ্বরূপস্য ভাসঃ প্রভায়াঃ কথঞ্চিৎ সদৃশী স্যাৎ নান্যোপমাস্তীত্যর্থঃ তথাভূতং রূপং দর্শয়ামাসেতি পূর্ব্বেণান্বয়ঃ ॥ ১২ ॥ ততঃ কিং বৃত্তমিত্যপেক্ষায়ামাহ তত্রেতি অনেকধা

সঞ্জয় উবাচ । এবমুক্ত্বা ততো রাজন্ মহাযোগেশ্বরো হরিঃ । দর্শয়ামাস পার্থায় পরমং রূপমৈশ্বরং ॥ ৯ ॥ অনেকবক্ত্রনয়নমনেকাদ্ভুতদর্শ
শ্রী ৪৭ নং । অনেকদিব্যাভরণং দিব্যানেকোদ্যতায়ুধং ॥ ১০ ॥ দিব্যমাল্যাম্বরধরং দিব্যগন্ধানুলেপনং । সর্ব্বাশ্চর্য্যময়ং দেবমনন্তং বিশ্বতোমুখং ॥ ১১ ॥
দিবি সূর্য্যসহস্রস্য ভবেদ্ যুগপদুত্থিতা । যদি ভাঃ সদৃশী সা স্যাদ্ ভাসস্তস্য মহাত্মনঃ ॥ ১২ ॥ তত্রৈকস্থং জগৎ কৃৎস্নং প্রবিভক্তমনেকধা । অপশ্যদ্ দেবদেবস্য
শরীরে পাণ্ডবস্তদা ॥ ১৩ ॥ ততঃ স বিস্ময়াবিষ্টো হৃষ্টরোমা ধনঞ্জয়ঃ । প্রণম্য শিরসা দেবং কৃতাঞ্জলিরভাষত ॥ ১৪ ॥ অর্জ্জুন উবাচ ॥ পশ্যামি দেবাংস্তব দেব দেহে
সর্ব্বাংস্তথা ভূতবিশেষসংঘান্ । ব্রহ্মাণমীশং কমলাসনস্থমৃষীংশ্চ সর্ব্বানুরগাংশ্চ দিব্যান্ ॥ ১৫ ॥

প্রবিভক্তং নানাবিভাগেনাবস্থিতং কৃৎস্নং জগৎ দেবদেবস্য শরীরে তদৈকস্থং একত্রস্থিতং তদা পাণ্ডবোঽর্জ্জুনোঽপশ্যৎ ॥ ১৩ ॥ এবম্ভূতং কিং কৃতবানিত্যত আহ তত ইতি ততো দর্শনানন্তরং বিস্ম
য়াবিষ্টো আশ্চর্য্যসম্বদ্ধঃ সন্ হৃষ্টানি পুলকিতানি রোমাণি যস্য সঃ ধনঞ্জয়ো দেবং তমেব শিরসা প্রণম্য কৃতাঞ্জলিঃ সম্পুটীকৃতহস্তঃ সন্নভাষত উক্তবান্ ॥ ১৪ ॥ ভাষণমাহ পশ্যামীতি সপ্তদশভি
রর্জ্জুন উবাচ পশ্যামীতি হে দেব তব দেহে দেবানাদিত্যাদীন্ পশ্যামি তথা সর্ব্বভূতবিশেষাণাং জরায়ুজাণ্ডজাস্বেদজাদীনাং সংঘান্ সমূহান্ তথাদিত্যান্ ঋষীন্ বশিষ্ঠাদীন্ তথা তেষাং
দেবানামীশং স্বামিনং ব্রহ্মাণঞ্চ কথম্ভূতং কমলাসনস্থং পৃথ্বীপদ্মকর্ণিকায়াং মেরৌ স্থিতমিত্যর্থঃ যদ্বা রত্নাভিপদ্মাসনস্থমিতি ॥ ১৫ ॥ শ্রীরামায় নমঃ

কিঞ্চ অনেকেতি : অনেকানি বাহ্বাদীনি যস্য : তং ত্বাং পশ্যামি : অনন্তানি রূপাণি যস্য তং ত্বাং সর্বতঃ পশ্যামি : তব তু আদিং মধ্যং অন্তঞ্চ ন পশ্যামি : সর্বগতত্বাৎ ॥ ১৬ ॥ কিরীটিনমিতি : কিরীটিনং
মুকুটবন্তং চক্রবন্তঞ্চ : সর্বতো দীপ্তিমন্তঞ্চ : তেজঃপুঞ্জরূপঞ্চ : তথা দুর্নিরীক্ষ্যং দ্রষ্টুমশক্যঞ্চ : তত্র হেতুঃ : দীপ্তয়োঽনলার্কয়োর্দ্যুতির্যস্য তং : অতএবাপ্রমেয়ং এবম্ভূতমিতি নিশ্চেতুমশক্যং ত্বাং সম
ন্ততঃ পশ্যামি ॥ ১৭ ॥ যস্মাদেবমতর্ক্যমৈশ্বর্যং তস্মাত্ত্বমক্ষরমিতি : ত্বমেবাক্ষরং পরমং ব্রহ্ম মুমুক্ষুভির্বেদিতব্যং : ত্বমস্য বিশ্বস্য পরং নিধানং নিধীয়তেঽস্মিন্নিতি নিধানং প্রলয়স্থানং

অনেকবাহূদরবক্ত্রনেত্রং পশ্যামি ত্বাং সর্বতোঽনন্তরূপং । নান্তং ন মধ্যং ন পুন স্তবাদিং পশ্যামি বিশ্বেশ্বর বিশ্বরূপং ॥ ১৬ ॥ কিরীটিনং গদিনং চক্রিণ
ঞ্চ তেজোরাশিং সর্বতো দীপ্তিমন্তং । পশ্যামি ত্বাং দুর্নিরীক্ষ্যং সমন্তাদ্দীপ্তা নলার্কদ্যুতিমপ্রমেয়ং ॥ ১৭ ॥ ত্বমক্ষরং পরমং বেদিতব্যং ত্বমস্য বিশ্বস্য প
রং নিধানং । ত্বমব্যয়ঃ শাশ্বতধর্মগোপ্তা সনাতনস্ত্বং পুরুষো মতো মে ॥ ১৮ ॥ অনাদিমধ্যান্তমনন্তবীর্যমনন্তবাহুং শশিসূর্যনেত্রং ।
পশ্যামি ত্বাং দীপ্তহুতাশবক্ত্রং স্বতেজসা বিশ্বমিদং তপন্তং ॥ ১৯ ॥ দ্যাবাপৃথি ব্যোরিদমন্তরং হি ব্যাপ্তং ত্বয়ৈকেন দিশশ্চ সর্বাঃ । দৃষ্ট্বাদ্ভুতং রূপমিদং তবোগ্রং লোক
ত্রয়ং প্রব্যথিতং মহাত্মন্ ॥ ২০ ॥

ত্বং : অব্যয়ঃ নষ্টয়োনিত্যঃ শাশ্বতস্য ধর্মস্য গোপ্তা পালকঃ সনাতনশ্চিরন্তনঃ : পুরুষো মম সম্মতোঽসি ॥ ১৮ ॥ কিঞ্চ অনাদীতি : অনাদিমধ্যান্তং উৎপত্তিস্থিতিলয়রহিতং : অনন্তবীর্যং প্রভাবো যস্য তং : অন
ন্তা বাহবো যস্য তং : শশিসূর্যৌ নেত্রে যস্য : তং ত্বাং পশ্যামি : তথা দীপ্তো হুতাশো বক্ত্রে যস্য তং : স্বতেজসা ইদং বিশ্বং তপন্তং পশ্যামি ॥ ১৯ ॥ কিঞ্চ দ্যাবাপৃথিব্যোরিদমন্তরং অন্তরীক্ষং : ত্বয়ৈকে
ন ব্যাপ্তং : দিশশ্চ সর্বা ব্যাপ্তাঃ : অদ্ভুতং অদৃষ্টপূর্বং ত্বদীয়মুগ্রং ঘোরং রূপং দৃষ্ট্বা লোকত্রয়ং প্রব্যথিতং : অতিভীতং পশ্যামীতি পূর্বশ্লোকস্য সম্বন্ধঃ ॥ ২০ ॥ শ্রীরামায় নমঃ ২০ ॥

কিঞ্চ অমী হীতি । অমী হি সুরসঙ্ঘা ভীতাঃ সন্তস্ত্বাং বিশন্তি শরণং প্রবিশন্তি । তেষাং মধ্যে কেচিদ্ভীতাঃ দূরত এব স্থিত্বা কৃতসম্পুটকরযুগলাঃ সন্তো গৃণন্তি । জয় জয় রক্ষ রক্ষেতি প্রার্থয়ন্তে । স্বস্তি নঃ অস্তু
॥ ২১ ॥ কিঞ্চ রুদ্রেতি রুদ্রাশ্চাদিত্যাশ্চ বসবশ্চ যে চ সাধ্যানামদেবাঃ । বিশ্বেদেবাঃ অশ্বিনৌ দেবৌ মরুতো গণাঃ অমাবাসগণাশ্চ উষ্মাণং পিবন্তীতি উষ্মপাঃ পিতরঃ । উষ্মভাগা হি পিতর ইতি শ্রুতেঃ ।
গন্ধর্বাশ্চ যক্ষাশ্চ অসুরাশ্চ বিরোচনাদয়ঃ । সিদ্ধানাং সঙ্ঘাশ্চ তে বৈ সর্বত্র বিস্মিতাঃ সন্তঃ ত্বাং বীক্ষন্তে পশ্যন্তি ॥ ২২ ॥ কিঞ্চ রূপম্মহদিতি । হে মহাবাহো মহদ্বৃদ্ধিং তব রূপং দৃষ্ট্বা লোকাঃ স
র্ব্বে প্রব্যথিতাঃ অতিভীতাঃ তথাহঞ্চ প্রব্যথিতোঽস্মি । কিম্ভূতং রূপং দৃষ্ট্বা । বহূনি বক্ত্রাণি নেত্রাণি চ যস্মিন্ তৎ । বহবো বাহব উরবঃ পাদা যস্মিন্ তৎ । বহূনি উদরাণি যস্মিন্ । বহ্বীভির্দংষ্ট্রাভিঃ করালং বিকট

শ্রী ৪৮

অমী হি ত্বাং সুরসঙ্ঘা বিশন্তি কেচিদ্ভীতাঃ প্রাঞ্জলয়ো গৃণন্তি । স্বস্তীত্যুক্ত্বা মহর্ষিসিদ্ধসঙ্ঘাঃ স্তুবন্তি ত্বাং স্তুতিভিঃ পুষ্কলাভিঃ ॥ ২১ ॥ রুদ্রাদিত্যা বসবো
যে চ সাধ্যা বিশ্বেঽশ্বিনৌ মরুতশ্চোষ্মপাশ্চ । গন্ধর্বযক্ষাসুরসিদ্ধসঙ্ঘা বীক্ষন্তে ত্বাং বিস্মিতাশ্চৈব সর্ব্বে ॥ ২২ ॥ রূপম্মহত্তে বহুবক্ত্রনেত্রং মহাবাহো বহুবাহূরুপা
দং । বহূদরং বহুদংষ্ট্রাকরালং দৃষ্ট্বা লোকাঃ প্রব্যথিতাস্তথাহং ॥ ২৩ ॥ ন ভস্পৃশং দীপ্তমনেকবর্ণং ব্যাত্তাননং দীপ্তবিশালনেত্রং । দৃষ্ট্বা হি ত্বাং প্রব্যথি
তান্তরাত্মা ধৃতিং ন বিন্দামি শমঞ্চ বিষ্ণো ॥ ২৪ ॥ দংষ্ট্রাকরালানি চ তে মুখা নি দৃষ্ট্বৈব কালানলসন্নিভানি । দিশো ন জানে ন লভে চ শর্ম্ম প্রসীদ দেবেশ জগন্নিবাস ॥ ২৫

ভমিত্যর্থঃ ॥ ২৩ ॥ নভঃস্পৃশমিতি অহন্তেতদেব স্পৃশন্তং ভজতি : নভঃস্পৃশতীতি নভঃস্পৃক্ তং অন্তরীক্ষব্যাপিনমিত্যর্থঃ : দীপ্তং তেজোময়ং অনেকবর্ণা যস্য : ব্যাত্তানি বিবৃতানি আননানি যস্য তং : দীপ্তানি বিশালা
নি নেত্রাণি যস্য তং এবম্ভূতং ত্বাং দৃষ্ট্বা প্রব্যথিতং ভয়ব্যাকুলং অন্তরাত্মা মনো যস্য : সোঽহং ধৃতিং ন বিন্দামি : শমং উপশমঞ্চ ন লভে ॥ ২৪ ॥ কিঞ্চ দংষ্ট্রেতি : হে দেবেশ তব মুখানি দৃষ্ট্বা :
তয়াবেশেন দিশো ন জানামি : শর্ম্ম সুখঞ্চ ন লভে : হে জগন্নিবাস প্রসন্নো ভব : কীদৃশানি দংষ্ট্রাভিঃ করালানি : কালানলঃ কালাগ্নিঃ তৎসদৃশানি ॥ ২৫ ॥

যচ্চান্যদ্দ্রষ্টুমিচ্ছসি জয়ং বানেনাস্মিন্ সংগ্রামে ভাবিজয়পরাজয়াদিকং তন্মম দেহে পশ্যেতি ভগবতোক্তং তদিদানীং পশ্যন্নাহ অমী চেতি পঞ্চভিঃ অমী ধৃতরাষ্ট্রস্য পুত্রা দুর্যোধনাদয়ঃ সর্বে অবনীপালানাং জয়দ্র
থাদীনাং সঙ্ঘৈঃ সমূহৈঃ সহৈব ত্বরমাণা বিশন্তীত্যুত্তরেণান্বয়ঃ তথা ভীষ্মো দ্রোণঃ অসৌ সূতপুত্রঃ কর্ণঃ ন কেবলং তে অপি তু অস্মদীয়াঃ যোধমুখ্যাঃ ধৃষ্টদ্যুম্নাদ
য়ঃ তৈঃ সহ ॥ ২৬ ॥ বক্ত্রাণীতি ত্বরমাণা ধাবন্তস্তব দংষ্ট্রাভিঃ করালানি বিকৃতান্যতএব ভয়ানকানি বক্ত্রাণি বিশন্তি তেষাং মধ্যে কেচিচ্চূর্ণিতৈঃ শিরোভিঃ উপলক্ষিতাঃ দন্তসন্ধিষু সংশ্লিষ্টা দৃশ্যন্তে
॥ ২৭ ॥ প্রবেশমেব দৃষ্টান্তেনাহ যথেতি নদীনামনেকমার্গৈঃ প্রবৃত্তানাং বহবো অম্বুনাং বেগাঃ সমুদ্রাভিমুখাঃ সন্তো যথা সমুদ্রমেবাভিদ্রবন্তি তথা অমী যে নরলোকবীরাস্তে অভিতো

অমী চ ত্বাং ধৃতরাষ্ট্রস্য পুত্রাঃ সর্বে সহৈবাবনীপালসঙ্ঘৈঃ। ভীষ্মো দ্রোণঃ সূ
তপুত্রস্তথাসৌ সহাস্মদীয়ৈরপি যোধমুখ্যৈঃ ॥ ২৬ ॥ বক্ত্রাণি তে ত্বরমাণা বিশ
ন্তি দংষ্ট্রাকরালানি ভয়ানকানি। কেচিদ্বিলগ্না দশনান্তরেষু সন্দৃশ্যন্তে চূর্ণি
তৈরুত্তমাঙ্গৈঃ ॥ ২৭ ॥ যথা নদীনাং বহবোঽম্বুবেগাঃ সমুদ্রমেবাভিমুখা দ্রবন্তি। তথা
তবামী নরলোকবীরা বিশন্তি বক্ত্রাণ্যভিতো জ্বলন্তি ॥ ২৮ ॥ যথা প্রদীপ্তং জ্বলনং
পতঙ্গা বিশন্তি নাশায় সমৃদ্ধবেগাঃ। তথৈব নাশায় বিশন্তি লোকাস্তবাপি বক্ত্রা
ণি সমৃদ্ধবেগাঃ ॥ ২৯ ॥ লেলিহ্যসে গ্রসমানঃ সমন্তাল্লোকান্ সমগ্রান্ বদনৈর্জ্বলদ্ভিঃ।
তেজোভিরাপূর্য জগৎ সমগ্রং ভাসস্তবোগ্রাঃ প্রতপন্তি বিষ্ণো ॥ ৩০ ॥

জ্বলন্তি সর্বতঃ প্রদীপ্যমানানি তব বক্ত্রাণি বিশন্তি ॥ ২৮ ॥ অবশানাং প্রবেশে নদীদৃষ্টান্ত উক্তঃ বুদ্ধিপূর্বকপ্রবেশে দৃষ্টান্তমাহ যথেতি প্রদীপ্তং জ্বলনং অগ্নিং পতঙ্গাঃ মনস্তা বুদ্ধিপূর্বং সমৃদ্ধবেগা যথা
নাশায় মরণায়ৈব বিশন্তি তথৈব লোকাস্তবাপি বক্ত্রাণি প্রবিশন্তি ॥ ২৯ ॥ ত্বং কিমাহ লেলিহ্যস ইতি গ্রসমানো গিলন্ সমগ্রান্ লোকান্ সর্বান্ বীরান্ সর্বতো জ্বলদ্ভির্বদনৈর্লেলিহ্য
সে অতিশয়েনাশ্নাসি কেইন তৈর্বদনৈঃ কিঞ্চ হে বিষ্ণো তব ভাসো দীপ্তয়ঃ তেজোভির্বিস্ফুরন্তঃ সমস্তং জগদ্ব্যাপ্য তীব্রাঃ সত্যঃ প্রতপন্তি প্রতপ্তং কুর্বন্তি ॥ ৩০ ॥

যস্মাদেবং তস্মাদাখ্যাহীতি ৷ উগ্ররূপঃ কস্ত্বমেতন্মে আখ্যাহি কথয় ৷ তুভ্যং নমোঽস্তু ৷ দেববর প্রসন্নো ভব ৷ ভবন্তমাদ্যং বিশেষেণ জ্ঞাতুমিচ্ছামি ৷ যতস্তব প্রবৃত্তিং চেষ্টাং কিমর্থমেবং প্রবৃত্তোঽসি ৷ ইতি ন জানামি এবং ত্ব
ত্তব প্রবৃত্তিং বর্ত্তমানমপি ন জানামীতি বা ॥৩১॥ এবং প্রার্থিতঃ সন্ ভগবানুবাচ ৷ কালোঽস্মীতি ত্রিভিঃ ৷ লোকানাং ক্ষয়কর্ত্তা প্রবৃদ্ধোঽত্যুৎকটঃ কালোঽস্মি ৷ লোকান্ প্রাণিনঃ সংহর্ত্তুমিহ লোকে প্রবৃত্তোঽস্মি ৷ অতস্ত্বা
মৃতেঽপি ত্বাং যুদ্ধাদ্বিনা ন ভবিষ্যন্তি ৷ ন জীবিষ্যন্তি ৷ প্রত্যনীকেষু প্রতিপক্ষানীকেষু ভীষ্মদ্রোণাদীনাং সর্বাস্বপি সেনাসু যোদ্ধারো যেঽবস্থিতাস্তে সর্বেঽপি ॥৩২॥ যস্মাদেবং তস্মাত্ত্বমুত্তিষ্ঠ যুদ্ধায় উদ্যুক্তো ভব ৷ দেবৈরপি দুর্জ্জ
য়া ভীষ্মাদয়ঃ অর্জ্জুনেন নির্জ্জিতা ইত্যেবং রূপং যশো লভস্ব প্রাপ্নুহি ৷ অযত্নতঃ শত্রূন্ জিত্বা সমৃদ্ধং রাজ্যং ভুঙ্ক্ষ্ব ৷ এতে চ তব শত্রবঃ ত্বদীয় যুদ্ধাৎ পূর্বমেব ময়া কালাত্মনা নিহতপ্রায়াঃ ৷ অতস্ত্বং নিমিত্তমাত্রং ভব

আখ্যাহি মে কো ভবানুগ্ররূপো নমোঽস্তু তে দেববর প্রসীদ ৷ বিজ্ঞাতুমিচ্ছামি ভবন্তমাদ্যং ন হি প্রজানামি তব প্রবৃত্তিং ॥৩১॥ শ্রীভগবানুবাচ ॥ কালোঽস্মি লো-
দ্বিঃ ৪৭ কক্ষয়কৃৎ প্রবৃদ্ধো লোকান্ সমাহর্ত্তুমিহ প্রবৃত্তঃ ৷ ঋতেঽপি ত্বাং ন ভবিষ্যন্তি সর্বে যেঽবস্থিতাঃ প্রত্যনীকেষু যোধাঃ ॥৩২॥ তস্মাত্ত্বমুত্তিষ্ঠ যশো লভস্ব জিত্বা শত্রু-
ন্ ভুঙ্ক্ষ্ব রাজ্যং সমৃদ্ধং ৷ ময়ৈবৈতে নিহতাঃ পূর্বমেব নিমিত্তমাত্রং ভব সব্যসাচিন্ ॥৩৩॥ দ্রোণঞ্চ ভীষ্মঞ্চ জয়দ্রথঞ্চ কর্ণং তথান্যানপি যোধবীরান্ ৷ ময়া হ-
তাংস্ত্বং জহি মা ব্যথিষ্ঠা যুধ্যস্ব জেতাসি রণে সপত্নান্ ॥৩৪॥ সঞ্জয় উবাচ ॥ এতচ্ছ্রুত্বা বচনং কেশবস্য কৃতাঞ্জলির্বেপমানঃ কিরীটী ৷ নমস্কৃত্বা ভূয় এবাহ কৃষ্ণং সগদ্গদং ভীতভীতঃ প্রণম্য ॥৩৫॥

হে সব্যসাচিন্ সব্যেন বামেন হস্তেন সচিত্তং সন্ধাতুং শীলমস্যেতি ব্যুৎপত্ত্যা বামেনাপি শরক্ষেপাৎ সব্যসাচী মুখ্যতঃ ॥৩৩॥ নচৈতদ্বুদ্ধিমদ্ভক্তবদিত্যাদি যা আশঙ্কা সা ন কার্যেত্যাহ ৷ দ্রোণমিত্যাদি ৷ যেষু চ ত্বং
শঙ্কসে তান্ দ্রোণাদীন্ ময়ৈব হতান্ ত্বং জহি ঘাতয় ৷ মা ব্যথিষ্ঠা ভয়ং মা কার্ষীঃ ৷ সপত্নান্ শত্রূন্ রণে যুদ্ধে নিশ্চিতং জেতাসি জেষ্যসি ॥৩৪॥ ততো হর্ষাৎ যৎ তদ্বৃত্তং বাচ্যং প্রতি সঞ্জয় উবাচ ॥ এতদিতি
॥ এতৎ কেশবস্য বচনং শ্রুত্বা বেপমানঃ কিরীটী অর্জ্জুনঃ কৃতাঞ্জলিঃ নিঃসম্প্রীতি ভীতঃ সন্ কৃষ্ণং নমস্কৃত্য পুনরপ্যাহ উক্তবান্ ৷ কথমাহ ৷ ভয়হর্ষাভ্যাং যথাবেশবশাৎ দেন কণ্ঠকম্পেন
সহ বক্তৃত্বমিতি ৷ সগদ্গদং যথা স্যাত্তথা ৷ কিঞ্চ ভীতাদপি ভীতঃ সন্ প্রণম্য ৷ আহ নমস্কৃত্য ॥ ৩৫ ॥

স্থানেত্যেকাদশভিঃশ্লোকৈঃ স্থানেত্যেবং যুক্তমিত্যস্মিন্নর্থে হে হৃষীকেশ যতএবং ভবান্ প্রভাবোঽত্যদ্ভুতঃ সর্বস্য অতস্তব প্রকীর্ত্যা মাহাত্ম্যসংকীর্তনেন ন কেবলং অহং প্রহৃষ্যামীতি অপিতু জগৎপ্র
হৃষ্যতি প্রকর্ষেণ হর্ষং প্রাপ্নোতি এতৎস্থানে যুক্তমেব নচিত্রমিত্যর্থঃ তথা জগৎসর্বমনুরজ্যতে চ অনুরাগঞ্চোপৈতীতি রক্ষাংসিভীতানি সন্তি দিশঃপ্রতি দ্রবন্তি পলায়ন্তে ইতি যৎ সর্বেযোগতপো
মন্ত্রাদিসিদ্ধানাং সংঘানমস্যন্তি প্রণমন্তীতি যৎ এতচ্চ স্থানে যুক্তমেবনচিত্রমিত্যর্থঃ ॥ ৩৬ ॥ অত্র হেতুমাহ কস্মাদিতি হে মহাত্মন্ হে অনন্ত হে দেবেশ হে জগন্নিবাস কস্মাদ্ধেতোঃ তে তুভ্যং ন নমেরন্
নমস্কারং ন কুর্যুঃ কথম্ভূতায় ব্রহ্মণোঽপি গরীয়সে গুরুতরায় আদিকর্ত্রে ব্রহ্মণোঽপি জনকায় কিঞ্চ সদ্ব্যক্তং অসদব্যক্তং তয়োঃ পরং মূলকারণং যদক্ষরং ব্রহ্ম তচ্চ ত্বমেব অতস্তৈর্নমস্কারস্তে যুক্ত ইতি স

স্থানেহৃষীকেশতবপ্রকীর্ত্যাজগৎপ্রহৃষ্যত্যনুরজ্যতে চ ২ রক্ষাংসিভীতা নি দিশোদ্রবন্তি সর্বেনমস্যন্তি চ সিদ্ধসংঘাঃ ॥ ৩৬ ॥ কস্মাচ্চতেননমে
রন্মহাত্মনগরীয়সেব্রহ্মণোপ্যাদিকর্ত্রে । অনন্তদেবেশজগন্নিবাসত্বমক্ষরং সদসৎপরংযৎ ॥ ৩৭ ॥ ত্বমাদিদেবঃপুরুষঃপুরাণস্ত্বমস্যবিশ্বস্যপরং
নিধানং ২ বেত্তাসিবেদ্যঞ্চপরঞ্চধামত্বয়াততংবিশ্বমন ন্তরূপ ॥ ৩৮ ॥ বায়ুর্যমোগ্নির্বরুণঃশশাঙ্কঃ প্রজাপতি
স্ত্বংপ্রপিতামহশ্চ ২ নমোনমস্তেস্তুসহস্রকৃত্বঃ পুনশ্চভূয়োপিনমোনমস্তে ॥ ৩৯ ॥ ৩৯ ॥

র্বে নমস্যন্তীতি নচিত্রমিত্যর্থঃ ॥ ৩৭ ॥ কিঞ্চ ত্বমিতি দেবানামাদিঃ যতঃ পুরুষঃ অনাদিঃ পুরাণশ্চ ত্বং । অতস্ত্বমস্য বিশ্বস্য পরং নিধানং লয়স্থানং তথা বিশ্বস্য বেত্তা বেদিতা জ্ঞাতাসি যচ্চ বেদ্যং বস্তুজাতং পরঞ্চ
ধাম বৈষ্ণবং পদং তদপি ত্বমেবাসি হে অনন্তরূপ ত্বয়ৈবেদং বিশ্বং ততং ব্যাপ্তং এতৈঃ সর্বৈর্হেতুভিস্ত্বমেব নমস্কার্য্য ইতি ভাবঃ ॥ ৩৮ ॥ অতস্ত্বমেব সর্বৈর্নমস্কার্য্যঃ সর্বদেবাত্মকত্বাদিতি স্তুবন্ স্বয়মপি নমস্করো
তি বায়ুরিতি বায়াদিরূপস্ত্বমিতি সর্বদেবাত্মকত্বার্থমুক্তং প্রজাপতিঃ পিতামহস্তস্যাপি জনকত্বাৎ প্রপিতামহশ্চ ত্বং অতস্তে তুভ্যং সহস্রকৃত্বঃ সহস্রশো নমোঽস্তু ভূয়ঃ পুনরপি সহস্রকৃত্বো নমো নম
ইতি ভক্তিশ্রদ্ধাদেরতিশয়েন নমস্কারেষ্বতৃপ্তিমনবগচ্ছন্ বহুশঃ প্রণমতি ॥ ৩৯ ॥

কিঞ্চ নমঃ পুর ইতি: হে সর্ব সর্বাত্মন সর্বাসু দিক্ষু তে তুভ্যং নমোস্তু: সর্বত্বমেবোপপাদয়ন্নাহ: অনন্তং বীর্যং সামর্থ্যং যস্য তথা অমিতো বিক্রমঃ পরাক্রমো যস্য সঃ এবম্ভূতস্ত্বং সর্বং বিশ্বং সম্যগন্তর্বহিশ্চ ব্যাপ্নোষি: অ
বর্নিরেকেন কনকেন কটকাদিস্বকার্যং ব্যাপ্যতে অতঃ সর্বস্বরূপো ভবসি ॥ ৪০ ॥ ইদানীন্তু পূর্বকৃতং ক্ষমাপয়তি সখেতি দ্বাভ্যাং: ত্বং প্রাকৃতঃ সখেতি মত্বা হঠাৎ তিরস্কারেণ যদুক্তং তৎ ক্ষাময়ে: ত্বামিত্যুত্তরে
ণান্বয়ঃ: কিন্তু: হে কৃষ্ণ হে যাদব: সখেতি চ সর্বিকর্ষার্থঃ প্রসভং তবজ্ঞোহেতুস্তব মহিমানং তবেদং বিশ্বরূপমজানতা ময়া প্রমাদাৎ প্রণয়েন স্নেহেনাপি চ যদুক্তমিতি ॥ ৪১ ॥ কিঞ্চ: যচ্চেতি: হে অচ্যু
ত যচ্চাবহাসার্থং ক্রীড়াদিষু তিরস্কৃতোসি: একঃ কেবলঃ সখায়ং বিনা রহসি স্থিত ইত্যর্থঃ। অথবা তৎসমক্ষং তেষাং সখীনাং সমক্ষং প্রত্যক্ষং বাপি তৎ সমস্তমপরাধজাতং ত্বামপ্রমেয়মচিন্ত্যপ্রভাবং

শ্রীঃ

নমঃ পুরস্তাদথ পৃষ্ঠতস্তে নমোস্তু তে সর্বত এব সর্ব। অনন্তবীর্যামি
তবিক্রমস্ত্বং সর্বং সমাপ্নোষি ততোসি সর্বঃ ॥ ৪০ ॥ সখেতি মত্বা প্রসভং যদুক্তং
হে কৃষ্ণ হে যাদব হে সখেতি। অজানতা মহিমানং তবেদং ময়া প্রমাদাৎ প্রণ
য়েন বাপি ॥ ৪১ ॥ যচ্চাবহাসার্থমসৎকৃতোসি বিহারশয্যাসনভো
জনেষু। একোহথবাপ্যচ্যুত তৎসমক্ষং তৎ ক্ষাময়ে ত্বামহমপ্রমেয়ং ॥ ৪২
॥ পিতাসি লোকস্য চরাচরস্য ত্বমস্য পূজ্যশ্চ গুরুর্গরীয়ান্। ন ত্বৎসম
স্ত্যভ্যধিকঃ কুতোন্যো লোকত্রয়েপ্যপ্রতিমপ্রভাব ॥ ৪৩ ॥ তস্মাৎ প্রণম্য প্রণি
ধায় কায়ং প্রসাদয়ে ত্বামহমীশমীড্যং। পিতেব পুত্রস্য সখেব সখ্যুঃ প্রিয়ঃ প্রিয়ায়া
র্হসি দেব সোঢুং ॥ ৪৪ ॥

ক্ষাময়ে: ক্ষমাং কারয়ামি ॥ ২৪ ॥ অচিন্ত্যপ্রভাবমাহ: পিতেতি: ন বিদ্যতে প্রতিমা উপমা যস্য সোহপ্রতিমঃ তথাবিধঃ প্রভাবো যস্য তব: হে অপ্রতিমপ্রভাব ত্বমস্য চরাচরস্য লোকস্য পিতা
জনকোসি: অতএব পূজ্যোসি গুরুশ্চ গুরোরপি গরীয়ান্ গুরুতরঃ: অতো লোকত্রয়েপি ত্বৎসমঃ অন্যো নাস্তি: পরমেশ্বরস্যানেকস্যাভাবাৎ: ত্বত্তোধিকঃ পুনঃ কুতঃ স্যাৎ ॥ ৪৩ ॥ যস্মা
দেবং তস্মাৎ প্রণম্যেতি: তস্মাৎ ত্বামীশং জগন্নিয়ন্তারমীড্যং স্তুত্যং প্রসাদয়ামি: কথং কায়ং প্রণিধায় দণ্ডবন্নিপাত্য ইত্যর্থঃ: অতস্ত্বং মমাপরাধং সোঢুং ক্ষন্তুমর্হসি: কস্যেব: পুত্রস্যাপরাধং যথা
পিতা যথা ক্ষমতে: সখ্যুঃ মিত্রস্যাপরাধং সখা নিরুপাধিবন্ধুঃ যথা: প্রিয়স্যাপরাধং প্রিয়ঃ প্রিয়ায়াঃ যথা তদ্বৎ ॥ ৪৪ ॥ ওঁ রামায় নমঃ ॥

এবং ক্ষমাপ্য প্রার্থয়তে : অদৃষ্টেতি দ্বাভ্যাং অদৃষ্টপূর্ব্বমিতি : হে দেব পূর্ব্বমদৃষ্টং তব রূপং দৃষ্ট্বা হৃষিতোস্মি তথা ভয়েন চ মে মন : প্রব্যথিতং প্রচলিতং তস্মান্মমব্যথানিবৃত্তয়ে তদেব রূপং দর্শয় : হে দেবেশ জ
গন্নিবাস প্রসন্নো ভব ॥ ৪৫ ॥ তদেব রূপং বিশেষয়ন্নাহ : কিরীটিনমিতি : কিরীটিনং গদাবন্তং চক্রহস্তং দ্রষ্টুমিচ্ছামি : পূর্ব্বং যথা দৃষ্টবানস্মি তথৈব : অতশ্চ হে সহস্রবাহো বিশ্বমূর্ত্তে ইদং রূপম্ উপ
সংহৃত্য : তেনৈব কিরীটাদিযুক্তেন চতুর্ভুজেন রূপেণ ভব আবির্ভব : তদা নন্দশ্রীবৎসমহিমানং পূর্ব্বমপি কিরীটাদিযুক্তমেব পশ্যতীত্যবগম্যতে : যত্তু পূর্ব্বমুক্তং বিশ্বরূপদর্শনে কিরীটিনং গদিনং চক্রিণং চ পশ্যা
মীতি তদিহ কিরীটাদ্যভিপ্রায়েণ : যদ্বা এতাবন্তং কালং স্বপ্রসন্নং কিরীটিনং গদিনং চক্রিণং চ ত্বামপশ্যন্ অমরে দানীং তেজোরাশিং দুর্নিরীক্ষ্যং পশ্যামীত্যেবং প্রবচনমর্জ্জুনস্যাবিরোধঃ ॥ ৪৬ ॥ এবং প্রার্থি

অদৃষ্টপূর্ব্বং হৃষিতোস্মি দৃষ্ট্বা ভয়েন চ প্রব্যথিতং মনো মে । তদেব মে দর্শয় দেব রূপং প্রসীদ দেবেশ জগন্নিবাস ॥ ৪৫ ॥ কিরীটিনং গদিনং চক্রহ
স্তমিচ্ছামি ত্বাং দ্রষ্টুমহং তথৈব । তেনৈব রূপেণ চতুর্ভুজেন সহস্রবাহো ভব বিশ্বমূর্ত্তে ॥ ৪৬ ॥ শ্রীভগবানুবাচ ॥ ময়া প্রসন্নেন তবার্জ্জুনেদং রূপং প
রং দর্শিতমাত্মযোগাৎ । তেজোময়ং বিশ্বমনন্তমাদ্যং যন্মে ত্ব দন্যেন ন দৃষ্টপূর্ব্বং ॥ ৪৭ ॥ ন বেদযজ্ঞাধ্যয়নৈর্ন দানৈর্ন চ ক্রিয়া
ভির্ন তপোভিরুগ্রৈঃ । এবংরূপঃ শক্য অহং নৃলোকে দ্রষ্টুং ত্বদন্যেন কুরুপ্রবীর ॥ ৪৮ ॥ মা তে ব্যথা মা চ বিমূঢ়ভাবো দৃষ্ট্বা রূপং ঘোরমীদৃঙ্
মমেদং । ব্যপেতভীঃ প্রীতমনাঃ পুনস্ত্বং তদেব মে রূপমিদং প্রপশ্য ॥ ৪৯ ॥

ততস্তং ভীতমাশ্বাসয়ন্ ভগবানুবাচ : ময়েতি ত্রিভিঃ : ময়া প্রসন্নেনেতি হে অর্জ্জুন ত্বং কিমিতি বিভেষি : যতো ময়া প্রসন্নেন কৃপয়া তবেদং রূপং দর্শিতং আত্মনো মম যোগাৎ যোগমায়াসামর্থ্যাৎ : পরং শ্রেষ্ঠং তেজোময়ং বিশ্বং
অনন্তমাদ্যঞ্চ যন্মম রূপং ত্বদন্যেন ত্বাদৃশাৎ ভক্তাদন্যেন পূর্ব্বং ন দৃষ্টং ॥ ৪৭ ॥ এতদ্দর্শনমতিদুর্ল্লভং ত্বং কৃতার্থোসি ইত্যাহ : ন বেদেতি : বেদাধ্যয়নমপি বিশেষকেন যজ্ঞাধ্যয়নস্যাভাবাৎ : যজ্ঞাধ্যয়নশব্দেন
যজ্ঞবিদ্যাশ্চ কল্পসূত্রাণ্যভিধীয়ন্তে : বেদানাং যজ্ঞবিদ্যানাঞ্চাধ্যয়নৈরিত্যর্থঃ : ন চ দানৈঃ ন চ ক্রিয়াভিরগ্নিহোত্রাদিভির্ন চোগ্রৈস্তপোভিশ্চান্দ্রায়ণাদিভিরেবংরূপোহং অহং ত্বদন্যেন মনুষ্যলোকে দ্রষ্টুং শক্যঃ : ম
পিতু ত্বমেব মৎপ্রসাদেন দৃষ্টবানসি ॥ ৪৮ ॥ এবমপি চেত্তবেদং ঘোরং রূপং দ্রষ্টুং যথা তর্হি তদেব রূপং দর্শয়ামীত্যাহ : মা তে ইতি : ঈদৃক্ ঈদৃশং রূপং ঘোরং মদীয়ং দৃষ্ট্বা তে যা ব্যথা যশ্চ বিমূঢ়ভাবো
বিমূঢ়তা স মাস্তু : কিন্তু ব্যপেতভীঃ প্রীতমনাশ্চ সন্ পুনস্ত্বং তদেবং মম রূপং প্রকর্ষেণ পশ্য ॥ ৪৯ ॥ ৪৯ ॥

এবং প্রোক্তোঽর্জুনং স্বং রূপং দর্শিতবান্ ইত্যাহ সঞ্জয় উবাচ বাসুদেবো ইত্যর্জুনমেবমুক্ত্বা যথাপূর্বমাসীৎ তথাভূতং কিরীটগদাদিযুক্তং চতুর্ভুজং স্বীয়ং রূপং দর্শয়ামাস । এবং মহাত্মা ভীতমেনং প্রসন্নবপুর্ভূত্বা পুনঃ
অপিচাশ্বাসিতবান্ মহাত্মা বিশ্বরূপঃ সৌম্যবপুর্ভূত্বেতি ॥৫০॥ ততো নির্ভয়ঃ সন্নর্জুন উবাচ দৃষ্ট্বেদং মানুষমিত্যাদি সচেতাঃ সন্নচিত্তঃ ইদানীং সংবৃত্তো জাতোঽস্মি প্রকৃতিং স্বাস্থ্যং গতঃ প্রাপ্তোঽস্মি শেষং স্প
ষ্টং ॥৫১॥ স্বরূপস্যাত্যন্তদুর্লভত্বং দর্শয়ন্ ভগবানুবাচ সুদুর্দর্শমিতি দ্বাভ্যাং যন্মম বিশ্বরূপং দৃষ্টবানসি ইদং সুদুর্দর্শং অন্যস্য দ্রষ্টুমশক্যং যস্মাদ্দেবা অপি অস্য রূপস্য সর্বদা দর্শনমিচ্ছন্তি
কেবলং ন পুনরিদং পশ্যন্তি ॥৫২॥ অত্র হেতুমাহ নাহমিত্যাদি স্পষ্টার্থঃ ॥৫৩॥ কেনোপায়েন তর্হি শক্যঃ ইত্যত আহ ভক্ত্যা ত্বিতি অনন্যয়া মদেকনিষ্ঠয়া ভক্ত্যা এবম্ভূতো বিশ্বরূপোঽহং তত্ত্বেন পরমার্থতো জ্ঞা

গী ৩১

সঞ্জয় উবাচ ॥ ইত্যর্জুনং বাসুদেবস্তথোক্ত্বা স্বকং রূপং দর্শয়ামাস ভূয়ঃ । আশ্বাসয়ামাস চ ভীতমেনং ভূত্বা পুনঃ সৌম্যবপুর্মহাত্মা ॥৫০॥ অর্জুন উবাচ ॥ দৃষ্ট্বেদং মানুষং রূপং
তব সৌম্যং জনার্দন । ইদানীমস্মি সংবৃত্তঃ সচেতাঃ প্রকৃতিং গতঃ ॥৫১॥ ভগবানুবাচ ॥ সুদুর্দর্শমিদং রূপং দৃষ্টবানসি যন্মম । দেবা অপ্যস্য রূপস্য নিত্যং দর্শনকাঙ্ক্ষিণঃ ॥
॥৫২॥ নাহং বেদৈর্ন তপসা ন দানেন ন চেজ্যয়া । শক্য এবংবিধো দ্রষ্টুং দৃষ্টবানসি মাং যথা ॥৫৩॥ ভক্ত্যা ত্বনন্যয়া শক্য অহমেবংবিধোঽর্জুন । জ্ঞাতুং দ্রষ্টুং চ তত্ত্বেন প্রবেষ্টুং চ পরন্তপ ॥৫৪॥
মৎকর্মকৃন্মৎপরমো মদ্ভক্তঃ সঙ্গবর্জিতঃ । নির্বৈরঃ সর্বভূতেষু যঃ স মামেতি পাণ্ডব ॥৫৫॥ ইতি শ্রীভগবদ্গীতাসূপনিষৎসু বিশ্বরূপদর্শনং নাম একাদশোঽধ্যায়ঃ ॥ ❋ ॥

তুং শক্যঃ শাস্ত্রতো দ্রষ্টুং প্রত্যক্ষতঃ প্রবেষ্টুং চ তত্ত্বেন চ শক্যঃ নান্যৈরুপায়ৈঃ ॥৫৪॥ অতঃ সর্বশাস্ত্রার্থসারং পরমং রহস্যং শৃণ্বিত্যাহ মদিতি মদর্থং কর্ম করোতীতি মৎকর্মকৃৎ অ
হমেব পরমঃ প্রকৃষ্টঃ পুরুষার্থো যস্য সঃ মামেব ভক্তঃ আশ্রিতঃ পুত্রাদিষু সঙ্গবর্জিতঃ নির্বৈরশ্চ সর্বভূতেষু এবম্ভূতো যঃ স মাং প্রাপ্নোতি ॥৫৫॥ দেবৈরপি সুদুর্দর্শং তৎ পাদ্মাদিকোটিভিঃ
ভক্তায় ভগবানেবং বিশ্বরূপমদর্শয়ৎ ॥ ইতি শ্রীগীতাটীকায়াং একাদশোঽধ্যায়ঃ ॥ ❋ ॥ ❋ ॥ নির্গুণোপাসনাদ্যৈব সগুণোপাসনস্য চ । শ্রেয়স্ত্বং কথয়ত্যস্মিন্ দ্বাদশে তু হরিঃ স্বয়ম্ ॥